भवान् यत्र हरिश्चन्द्रस्त्रिशङ्कुर्नहुषोऽपि वा ।
विश्वामित्रमुखेभ्योऽहं तत्रैको भवितुं क्षमः ॥ ६४८ ॥
विहस्योवाच तं राजा विश्वामित्रादिकोपतः ।
हरिश्चन्द्रादयो नष्टास्त्वयि क्रुद्धे तु किं भवेत् ॥ ६४९ ॥
पाणिना ताडयन्नुर्वीं ततः क्रुद्धोऽभ्यधाद्द्विजः ।
मयि क्रुद्धे क्षणादेव ब्रह्मदण्डः पतेन्न किं ॥ ६५० ॥
तत् श्रुत्वा विहसन्राजा कोपाद्ब्राह्मणमब्रवीत् ।
पततु ब्राह्मदण्डोऽसौ किमद्यापि विलम्बते ॥ ६५१ ॥
नन्वयं पतितो जाल्मेत्यथ विप्रेण भाषिते ।
राज्ञः कनकदण्डोऽङ्के वितानस्खलितोऽपतत् ॥ ६५२ ॥

कृतव्रणः स तेनाङ्गे विसर्पत्क्लिन्नविग्रहः ।
कीर्यमाणकृमिकुलः क्रकचैश्चारितैरभूत् ॥ ६५३ ॥
अनुभाव्य व्यथां भावि निरयक्लेशवर्णिकां ।
गणरात्रेण तं प्राणा कांक्षितापदमाजहुः ॥ ६५४ ॥
ब्रह्मदण्डकृतं दण्डं भुक्त्वा दण्डधराधिपः ।
अकाण्डदण्डस्त्रंष्टाथ ययौ दण्डधरान्तिकं ॥ ६५५ ॥
तस्यानियतचित्तस्य त्रिंशतं परिवत्सरान् ।
एवं प्रतापिनः सैकान् भूभोगो भूपतेरभूत् ॥ ६५६ ॥
तथा भूभृन्मत्स्या द्रविणकलुषाम्भःकृततृषः
स्थितिं स्वामुत्क्रान्ता विदधति कुमार्गानुसरणं ।
क्रियन्ते कान्तत्वानुगविकृतकैवर्तनिवहैर्यथाक्षोते
ऽकस्मात् स्थिरनिरयजालप्रणयिनः ॥ ६५७ ॥
कृतपापं तमुद्दिश्य विपन्नममृतप्रभा ।
मृतोद्धाराय तन्माता व्यधत्तामृतकेशवं ॥ ६५८ ॥
ललितापीडनामाभूत् ततो वसुमतीपतिः
देव्यां दुर्गाभिधायां यो जयापीडादजायत ॥ ६५९ ॥
बभूव रागिणो राज्ये राज्यकार्याण्यपश्यतः ।
यस्य वाराङ्गनाभोज्यं राज्यं दुर्णयदूषितं ॥ ६६० ॥
दुष्कृतेनार्जितं वित्तं पित्रा निरयभागिना ।

यश्चारणादिषु न्यस्यन्ननुरूपं व्ययं व्यधात् ॥ ६६१ ॥
बन्धकीबन्धुभावेन प्राप्तराजगृहाश्रयाः ।
तं पांश्वलीयविद्यानामन्तरङ्गं व्यधुर्विटाः ॥ ६६२ ॥
केशान् स्त्रीदशनच्छिन्नान् वक्षस्तन्नखलाञ्छितं ।
वपुषो मण्डनं मेने किरीटकटकोज्झितः ॥ ६६३ ॥
यो यो वेश्याकथाभिज्ञो यो यो नर्मविचक्षणः ।
स स तत्प्रियतां लेभे न शूरो न च पण्डितः ॥ ६६४ ॥
अतृप्तः स्त्रीभिरल्पाभिरुग्ररागः स पार्थिवः ।
जडं मेने जयापीडं स्त्रीराज्यान्निर्गतं जितात् ॥ ६६५ ॥
दिग्विजयव्यसनिनः पूर्वभूपान् जहास सः ।
गणिकाभोगसुखितः स्वसामयिकमध्यगः ॥ ६६६ ॥
सङ्कोचकारिणो वृद्धान्नर्मोक्तयोद्धेज्य वारयन् ।
तस्माद्विटजनो लेभे संप्रीतात् पारितोषिकं ॥ ६६७ ॥
अठचेट इव स्पष्टपरिहासविचक्षणः ।
सोऽलज्जयन्मन्त्रिवृद्धानास्थाने गणिकासखः ॥ ६६८ ॥
बन्धकीपादमुद्राङ्कं चारुप्रावरणादि सः ।
गौरवार्हान् दुराचारः सचिवान् पर्यधापयत् ॥ ६६९ ॥
मानी मनोरथो मन्त्री परं परिजहार तं ।
अशक्नुवन् यमयितुं मध्यपातपराङ्मुखः ॥ ६७० ॥

कुकृत्यं योगवाहित्वं वैधुर्यं हीनवृत्तिता ।
दुर्वृत्तस्य प्रभोरन्यत् परिहारान्न भेषजं ॥ ६७१ ॥
सुवर्णपार्श्वं विप्रेभ्यो दधत् फलपुरं तथा ।
भूभृत् स लोचनोत्सं च द्वादशाब्दानभूद्विभुः ॥ ६७२ ॥
कल्याणदेव्यां संजातो जयापीडमहीभुजा ।
संग्रामापीडनामाथ बभूव भुवनेश्वरः ॥ ६७३ ॥
पृथिव्यापीड इत्यन्यन्नाम बिभ्रत् स पार्थिवः ।
समाप्तिं सप्तभिर्वर्षैः साम्राज्यस्य समासदत् ॥ ६७४ ॥
श्रीचिप्पटजयापीडो वृहस्पत्यपराभिधः ।
ललितापीडजो राजा शिशुदेश्यस्ततोऽभवत् ॥ ६७५ ॥
रागग्रहगृहीतस्य ललितापीडभूपतेः ।
वेश्यायां कल्पपाल्यां यो जयादेव्यामजायत ॥ ६७६ ॥
उपाख्यस्याखुवग्रामकल्पपालस्य तां सुतां ।
रूपलुब्धोऽवरुद्धत्वमनैषीत् स हि भूपतिः ॥ ६७७ ॥
पद्मोत्पलककल्याणमम्मधर्मैः समातुलैः ।
बालकैः पाल्यमानाभूत् पृथिवी भोगभागिभिः ॥ ६७८ ॥
तस्य पञ्च महाशब्दान् ज्यायानुत्पलकोऽग्रहीत् ।
अन्ये जगृहिरेऽन्यानि कर्मस्थानानि मातुलाः ॥ ६७९ ॥
आयत्तीकृतसाम्राज्यैर्भ्रातृभिर्वन्दिताज्ञया ।

भूभृज्जनन्या विदधे जयादेव्यां जयेश्वरः ॥ ६८० ॥
राज्ञां कृपणवित्तैर्यत् प्रविष्टैः पुष्यते धनं ।
अचिरान्नीयते शान्तिमपूर्वैः कैश्चिदेव तत् ॥ ६८१ ॥
जयापीडस्य यत्किञ्चित् सूनुना ह्रि व्ययीकृतं ।
सूनुश्यालैरशेषं तत् तैः क्रमेण हृतं वसु ॥ ६८२ ॥
भगिनीभगसौभाग्यसंभवैर्विभवैः कृताः ।
ते भङ्गुराणां भोगानां भोक्तारो भाग्यभागिनः ॥ ६८३ ॥
निरङ्कुशं चेष्टमानाः शनकैस्त्यक्तशैशवात् ।
ते स्वस्त्रीयान्नृपान्नाशमकुलीनाः शशङ्किरे ॥ ६८४ ॥
अथाभिचारक्रियया मिथः संमन्त्र्य पापिभिः ।
राज्येच्छया तैः स्वस्त्रीयः स्वामी च स नृपो हृतः ॥ ६८५ ॥
भुक्तक्षितौ द्वादशाब्दांस्तस्मिन् व्यापादिते तथा ।
नैच्छन्नेकस्य ते राज्यं परस्परमहंकृताः ॥ ६८६ ॥
तेषामाक्रान्तदेशानां नाममात्रमहीपतीन् ।
तांस्तान् कर्तुमसामान्यान् विरोधोऽन्योन्यमुच्छ्रयौ ॥ ६८७ ॥
अथ मेघावलीदेव्यां जातो वप्पियभूपतेः ।
ज्येष्ठोऽप्यचाक्रिकतया योऽभूद्राज्यविवर्जितः ॥ ६८८ ॥
सोऽयं त्रिभुवनापीडो जयादेव्यामजीजनत् ।
राजानमजितापीडं तं बलादुत्पलो व्यधात् ॥ ६८९ ॥ युग्मं ॥

शेडादिगणनास्थाननिष्पन्दोत्था नृपाय ते ।
पञ्चमाद्गणनास्थानाद्दशनाच्छादने ददुः ॥ ६६० ॥
एकसंभाषणात् खेदं प्रात्स्वन्येषु दिने दिने ।
पञ्चतुल्यसुखान् नैच्छद्दुस्थो राजा तदाश्रितः ॥ ६६१ ॥
ते राजन्यजितापीडे राज्योत्पत्त्यपहारिणः ।
पुरदेवगृहादीनां प्रतिष्ठाकर्म चक्रिरे ॥ ६६२ ॥
सापत्यास्ते बुभुजिरे राज्यं स्वामिविवर्जितं ।
निर्जने महिषं शान्तं मिथः सेर्ष्या वृका इव ॥ ६६३ ॥
उत्पलेनोत्पलस्वामी तयोत्पलपुरं कृतं ।
पद्मस्यं पद्मस्वाम्यास्ते कृतिः पद्मपुरं तथा ॥ ६६४ ॥
बधूर्व्यधत्त पद्मस्य गुणादेवी गुणोज्ज्वला ।
मठमेकमधिष्ठाने द्वितीयं विजयेश्वरे ॥ ६६५ ॥
धर्मो धर्माग्रमो हेतुर्धर्मस्वामिविनिर्मितेः ।
कल्याणवर्मा सत्कर्मा कल्याणस्वामिकेशवे ॥ ६६६ ॥
दीनाराणां सहस्राणि पञ्चोपकरणं कृती ।
एकैकस्याः सुधर्धेनोः कृत्वा मम्मो महाधनः ॥ ६६७ ॥
पञ्चाशीतिसहस्राणि गवां दत्वा प्रकल्पयन् ।
कुम्भप्रतिष्ठासंभारं यो मम्मस्वामिनं व्यधात् ॥ ६६८ ॥
तस्यैकस्यैव सामग्र्यां कः संख्यां कर्तुमर्हति ।

भ्रातॄणां किं पुनस्तेषां सर्वेषां भूरिसंपदां ॥ ६९९ ॥
द्रोहार्जितास्तु वा लक्ष्मीः सुकृतोपार्जिताथ वा ।
सर्वेषां स्पृहनीयैव तेषां दातृतया तया ॥ ७०० ॥
कृता देवगृहास्तैर्ये तत्पार्श्वेऽन्यसुरास्पदैः ।
दिङ्मातङ्गसमीपस्थकलभौपम्यमाश्रितं ॥ ७०१ ॥
एकोननवते वर्षे स्वस्त्रीये शान्तिमागते ।
निर्विघ्नभोगास्तेऽभूवन् षट्त्रिंशाब्दात्ययावधि ॥ ७०२ ॥
अथ मम्मोत्पलकयोरुदभूद्दारुणो रणः ।
रुद्धप्रवाहा यत्रासीद्वितस्ता सुभटैर्हतैः ॥ ७०३ ॥
कविर्बुधमनःसिन्धुशशाङ्कः शङ्ककाभिधः ।
यमुद्दिश्याकरोत् काव्यं भुवनाभ्युदयाभिधं ॥ ७०४ ॥
मम्मसूनुर्यशोवर्मा संग्रामाग्रे व्यपाहरत् ।
स यत्र तेजः शूराणां नक्षत्राणामिवार्यमा ॥ ७०५ ॥
अथोत्पाट्याजितापीडं संग्रामापीडसंभवः ।
अनङ्गापीडनामाभूत् कृतो मम्मादिभिर्नृपः ॥ ७०६ ॥
मम्मोत्साहासहिष्णुत्वात् संभृतामर्षविकृतः ।
तस्य राज्यं द्विषन्नासीत् सुखवर्मोत्पलात्मजः ॥ ७०७ ॥
वर्षत्रयेणोत्पलके ततः प्रमयमागते ।
स चकारोत्पलापीडमजितापीडजं नृपं ॥ ७०८ ॥

तेषामाश्रयुजे राजसदृशानां मन्त्रीभुजां ।
भूत्वापि भृत्याः कृतिनो विभूतिं केऽपि लेभिरे ॥७०९॥
सान्धिविग्रहिकस्तस्य रत्नो नाम विभूतिभाक्
तस्मिन् कालेऽपि यश्चक्रे रत्नस्वामिसुरास्पदं ॥७१०॥
भेजुर्दार्वाभिसारादीन् देशानुत्तम्व्य भूपतौ ।
विमलाश्वाग्रामभुजो नराख्या व्यवहारिणः ॥७११॥
राज्ञां कर्कोटवंश्यानां क्षीणप्रायमभूत् कुलं ।
वंशस्तूत्पलकुल्यानां भुवि वैपुल्यमाययौ ॥७१२॥
सामर्थ्योपनतप्रायपार्थिवत्वो व्यपद्यत ।
विद्वेषात् सुखवर्माथ शुष्काख्येन स्वबन्धुना ॥७१३॥
ततः शूराभिधो मन्त्री सुखवर्मात्मजेऽकरोत् ।
राज्ययोग्योऽयमित्यास्थां सगुणेऽवन्तिवर्मणि ॥७१४॥
एकत्रिंशे स वर्षेऽथ प्रजाविप्लवशान्तये ।
विनिवार्योत्पलापीडं तमेव नृपतिं व्यधात् ॥७१५॥
यत्कृते विफलक्लेशा आसन् पितृपितामहाः ।
पौत्त्रेण हेलया प्राप्ता सा सिद्धिः पुण्यकर्मणा ॥७१६॥
कुम्भाः पयोनिधिपयोहरणप्रवृत्ता
नित्यं वहन्ति किल ये विफलश्रमत्वं ।
चित्रं क्षणादिह तदेकसमुद्भवेन सन्दर्शिता

निखिलवारिधिपानलीला ॥ ७१७ ॥

अभृत तदुरुमूर्ध्नि राजलक्ष्मीघटितकटाक्षकृतादिपट्टबन्धे ।
कनकघटमुखान्नवाभिषेकं झटिति
पतत्तमवन्तिवर्मदेवः ॥ ७१८ ॥

संप्राप्तावुपदेष्टुमिन्दुतपनौ युक्तं स्ववंशोद्भवै-
र्भूपालैर्नवराज्यतन्त्रमिव स श्रोत्रद्वये धारयन् ।
राजा मण्डनकुण्डलद्वयमिषात् स्वच्छातपत्र-
च्छलाल्लक्ष्मीविष्टरपुण्डरीकघटितच्छायोदयो द्युते ॥ ७१९ ।

॥ राजानः ॥ १७ ॥ ग्रन्थाः ॥ ७१९ ॥ आदितः राजानः
॥ ७० ॥ ग्रन्थाः ॥ १७८७ ॥

इति श्रीकाश्मीरिकमहामात्यचम्पकप्रभुसूनोः
कल्हणस्य कृतौ राजतरङ्गिण्यां चतुर्थस्तरङ्गः ॥

समाशतद्वये षष्टियुते मासेषु च ।
निर्दशाब्देषु कार्कोटवंशे सप्तदशाभवन् ।

॥ अथ पञ्चमस्तरङ्गः ॥

काप्येतेषु रुचिः कचेषु फणिनां पुंस्कोकिलस्येव ते
गोभिः कण्ठतटस्य क्षुभ्यति पुरो दृक् पश्य चक्षुःश्रुतेः ।
सन्धानेऽभिनवे मिथो भगवतोर्जिह्वा पृथक्स्पन्दिनी ।
भिन्नार्थो सदृशाक्षरामपि वदत्येवं गिरं पातु वः ॥ १ ॥

अवन्तिवर्मा साम्राज्यं प्राप्य पाटितकण्टकः ।
चकार चरितैश्चित्रं सतां कण्टकितं वपुः ॥ २ ॥

आसतां क्षितिपामात्यौ तौ द्वावपि परस्परं ।
आज्ञादाने परिवृढौ भृत्यावाज्ञापरिग्रहे ॥ ३ ॥

कृतज्ञः क्षान्तिमान् क्ष्माभृन्मन्त्री भक्तः स्मयोज्झितः ।
अभङ्गुरोऽयं संयोगः सुकृतैर्जातु दृश्यते ॥ ४ ॥

विवेक्ता प्राप्तराज्यः स क्ष्माभृद्वीक्ष्य-नृपश्रियं ।
अविलुप्तस्मृतिर्धीमानन्तरेवमचिन्तयत् ॥ ५ ॥

गोभुजां वल्लभा लक्ष्मीर्मातङ्गोत्सङ्गलालिता ।
सेयं स्पृहां समुत्पाद्य दूषयत्युन्नतात्मनः ॥ ६ ॥

स नास्ति कश्चित् प्रथमं यः प्रदर्श्यानुकूलतां ।
सन्ताप्येत् न चरमं नीचप्रीत्येव नानया ॥ ७ ॥

चपलाभिः प्रवृद्धेयं स्ववेश्याभिः सहाम्बुधौ ।
तदेकचारिणीवृत्तमनया शिक्षितं कुतः ॥ ८ ॥
निःस्नेहाननवगात् कांश्चित् सुचिरं संस्तुताप्यसौ ।
परलोकाध्वगान् भूपानपाथेयानबान्धवान् ॥ ९ ॥
हेमभोजनभाण्डादि भाण्डागारे यदर्जितं ।
कस्मादस्य न नाथास्ते लोकान्तरगता नृपाः ॥ १० ॥
अन्योच्छिष्टेषु पात्रेषु भुक्तैतेषु महीभुजः ।
कस्मान्न लज्जामवहन् शौचचिन्तां न वा दधुः ॥ ११ ॥
स्थूलेषु राजतस्थालकपालेष्ववलोकितैः ।
प्रेतभूपालनामाङ्कैः शङ्का कस्य न जायते ॥ १२ ॥
कृष्टाः प्रविष्टे ये कालपाशे कण्ठान्मुमूर्षतां ।
अशस्ता अपवित्राश्च ते हाराः कस्य हारिणः ॥ १३ ॥
सन्दूष्य वाष्पैर्दुःखोष्णैस्त्यक्तान् पूर्वैर्मुमूर्षुभिः ।
स्पृशन्नेतानलङ्कारान् न संकोचः कमाप्नुयात् ॥ १४ ॥
या वारिराशिसलिलान्तरसन्निधानसंसेवयापि
सततं मलिनैव लक्ष्मीः ।
पात्रेषु रौहशिखिभागिषु सा विमुक्ता
वैमल्यमेति हरिणीव हुताशशौचे ॥ १५ ॥
इति निर्ध्याय नृपतिर्नीत्वा स्वर्णादिचूर्णतां ।

निर्जैरञ्जलिभिः प्रादाद्द्विचन्मभ्यः करम्भकं ॥ १६ ॥
साधु भूपेति वक्तव्ये हर्षान्निर्गौरवं द्विजः ।
साध्ववन्तिन्निति वदन्नेकः प्रापाञ्जलीन् बहून् ॥ १७ ॥
लक्ष्मीं कृत्वार्थिसात् कृत्स्नां कृतिनावन्तिवर्मणा ।
विभूतिश्चामरच्छत्रमात्रशेषा व्यधीयत ॥ १८ ॥
अनन्तसंपत्संपन्नभूरिगोत्रजविप्लवे ।
राजश्रीर्दुर्जरा तस्य नवत्वे भूभुजोऽभवत् ॥ १९ ॥
विप्लुतः समरे भ्रातॄन् भ्रातृव्यांश्च विजित्य सः ।
चकार भूरिभिर्वीरै राज्यं विगतकण्टकं ॥ २० ॥
राज्यं निष्पाद्य निर्विघ्नमथ वात्सल्यपेशलः ।
विभज्य बन्धुभृत्येषु बुभुजे पार्थिवः श्रियं ॥ २१ ॥
भ्राता द्वैमातुरस्तेन शूरवर्माभिधः सुधीः ।
ज्ञातिप्रियेण वितते यौवराज्येऽभ्यषिच्यत ॥ २२ ॥
खाधूयाहस्तिकर्णाख्यावग्रहारौ प्रदाय यः ।
शूरवर्मा स्वामिनं च गोकुलं च विनिर्ममे ॥ २३ ॥
संपूर्णपुण्यमहिमा मर्त्यमाहात्म्यमन्दिरं ।
पञ्चहस्तप्रदश्चक्रे मठं सुकृतकर्मठः ॥ २४ ॥
भ्राता व्यधत्त नृपतेरपरः समराभिधः ।
केशवं चतुरात्मानं समरस्वामिनं तथा ॥ २५ ॥

द्वौ शूरावरजौ धीरचित्रपाख्यौ निजाख्यया ।
व्यधत्तां विबुधावासौ द्वावन्यौ गणनापती ॥ २६ ॥
भूत्वा बाकुलताछन्नप्रभावानुभवौ भुवि ।
गतौ सविग्रहाविव हरावासाय्यसत्यतां ॥ २७ ॥ युग्मं ॥
राजदौवारिकः श्रीमान् शूरस्यासीन्महोदयः ।
महोदयस्वामिनो यः प्रतिष्ठां संमपादयत् ॥ २८ ॥
रामजाख्यमुपाध्यायं ख्यातव्याकरणाश्रमं ।
व्याख्यातृपदकं चक्रे स तस्मिन् सुरमन्दिरे ॥ २९ ॥
अमात्येन महीभर्तुः श्रीप्रभाकरवर्मणा ।
कृतं प्रभाकरस्वामिनाम्नोविष्णोर्निकेतनं ॥ ३० ॥
आयातेन शुकैः सार्द्धं दत्ता गृहशुकेन यः ।
मुक्ताः प्राप्य प्रतिष्ठायां चक्रे ख्यातां शुकाबलीं ॥ ३१ ॥
विच्छिन्नप्रसरा विद्या भूयः शूरेण मन्त्रिणा ।
सत्कृत्य विदुषः सभ्यान् देशेऽस्मिन्नवतारिता ॥ ३२ ॥
युग्यैः क्षितिभुजां योग्यैरुह्यमानामहर्द्धयः ।
बुधाः प्रवृद्धसत्कारा भूपतेर्विविशुः सभां ॥ ३३ ॥
मुक्ताकणः शिवस्वामी कविरानन्दवर्द्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः ॥ ३४ ॥
आस्थाने कृतमन्दारो वन्दी शूरस्य मन्त्रिणः ।

संकल्पस्मृतिमाधातुमिमामार्यां सदापठत् ॥ ३५ ॥
अयमवसर उपकृतये प्रकृतिचला यावदस्ति संपदियं ।
विपदि सदाभ्युदयिन्यां पुनरुपकर्तुं कुतोऽवसरः ॥ ३६ ॥
कृतः सुरेश्वरी क्षेत्रे बहुगेहविधायिना ।
शिवयोर्मिश्रयोस्तेन प्रासादः सोऽव्ययस्थितिः ॥ ३७ ॥
शूरेश्वरं प्रतिष्ठाप्य स्ववेश्मैव समुन्नतं ।
चक्रे शूरमठं धीमान् स भोगाय तपस्विनां ॥ ३८ ॥
स्वकृते पत्तनवरे तेन शूरपुराभिधे ।
क्रमवर्त्तु प्रदेशस्थो ढक्काऽभूद्विनिवेशितः ॥ ३९ ॥
सुरेश्वरीप्राङ्गनतश्चक्रे भूतेश्वरं हरं ।
मठं शूरमठान्तश्च शूरजो रत्नवर्द्धनः ॥ ४० ॥
काव्यदेव्यभिधा शूरवधूः शुद्धान्वया व्यधात् ।
सदाशिवं सुरेश्वर्यां काव्यदेवीश्वराभिधं ॥ ४१ ॥
निर्मत्सरोऽवन्तिवर्मा सोदरेभ्योऽनपायिनीं ।
शूराय च स पुत्राय नृपतिः प्रक्रियां ददौ ॥ ४२ ॥
छन्दानुवर्त्ती भूपालो दैवतस्येव मन्त्रिणः ।
आबाल्याद्वैष्णवोऽप्यासीच्छैवतामुपदर्शयन् ॥ ४३ ॥
क्षेत्रे विश्वैकसाराख्ये मृतानामपवर्गदे ।
भूरिभोगास्पदं राज्ञा तेनावन्तिपुरं कृतं ॥ ४४ ॥

अवन्तिस्वामिनं तत्र प्राग्राज्याधिगमात् कृती ।
विधाय प्राप्तसाम्राज्यश्चक्रेऽवन्तीश्वरं तदा ॥ ४५ ॥
त्रिपुरेश्वरभूतेशविजयेशेषु भूभृता ।
स्नानद्रोण्या शैव्यमध्या तेन पीठत्रयं कृतं ॥ ४६ ॥
शूरस्यापि नरेन्द्रं तं ध्यायतः स्वाधिदैवतं ।
तत्प्रियार्थमुपेक्ष्योऽभूद्धर्मः प्राणाः सुतोऽपि वा ॥ ४७ ॥
तथा चार्चयितुं जातु यातो भूतेश्वरं नृपः ।
विभवानुगुणे स्वस्मिन् पूजोपकरणेऽर्पिते ॥ ४८ ॥
ददर्श पीठे देवस्य पूजकैरुपपादितं ।
वन्यमुत्पलशाकाख्यं तिक्तशाकमवस्थितं ॥ ४९ ॥
तत्रस्थाः क्ष्माभुजा पृष्टास्तन्निवेदनकारणं ।
व्यजिज्ञपन् क्षितिन्यस्तजानुप्राञ्जलयस्ततः ॥ ५० ॥
डामरो धन्वनामास्ति लहरे विषये बली ।
शूरस्य मन्त्रिणो देवसेवको यः सुतोपमः ॥ ५१ ॥
हृतेषु तेन ग्रामेषु निरवग्रहशालिना ।
निवेद्यमेतदेवास्मै भूतेशाय निवेद्यते ॥ ५२ ॥
अकाण्डशूलजनितां पार्थिवः कथयन् व्यथां ।
श्रुतमश्रुतवत्कृत्वा त्यक्तपूजोऽथ निर्ययौ ॥ ५३ ॥
पूजां सन्त्यज्य गमनं शूलं चाकस्मिकं प्रभोः ।

सद्धेतुकं विदन् शूरो वृत्तान्तान्वेषकोऽभवत् ॥ ५४ ॥
ज्ञाततत्त्वस्ततस्तूर्णं भूतेशाभ्यर्णवर्तिनः ।
क्रुद्धः समातृचक्रस्य भैरवस्याविशद्गृहं ॥ ५५ ॥
निषिद्धजनबाकुल्यो भूत्वा विरलपार्श्वगः ।
प्राङ्विणोद्धन्वमानेतुं ततो दूतान् पुनःपुनः ॥ ५६ ॥
स क्षितिं पत्तिपृतनासंमर्देन प्रकम्पयन् ।
अप्रकम्पतनुः प्राप क्रूरः शूरान्तिकं पुनः ॥ ५७ ॥
तस्य प्रविष्टमात्रस्य शस्त्रिणः शूरचोदिताः ।
मुण्डं सजीवितस्यैव चिच्छिदुर्भैरवाग्रतः ॥ ५८ ॥
आसन्ने सरसि क्षिप्त्वा रुधिरोद्गारि तद्वपुः ।
क्ष्मापतेः क्षालितामर्षो धीरः शूरो विनिर्ययौ ॥ ५९ ॥
तस्य श्रुत्वा शिरश्छिन्नं स्वपुत्रस्येव मन्त्रिणा ।
क्षीणमन्युः क्षितिपतिः सवैलक्ष्य इवाभवत् ॥ ६० ॥
शूरोऽथ पृष्टकुशलो निर्व्यथोऽस्मीति भाषिणं ।
उत्थाप्य तल्पात् तं देवं पूजाशेषमकारयत् ॥ ६१ ॥
इत्थं समस्तकृत्येषु भावज्ञः स महीपतेः ।
अनुक्त्वैव हितं तत् तु प्राणांस्त्यक्त्वाप्यसाधयत् ॥ ६२ ॥
परस्परमनुत्पन्नमन्युकालुष्यदूषणौ ।
न दृष्टौ न श्रुतावन्यौ तादृशौ राजमन्त्रिणौ ॥ ६३ ॥

श्रीमेघवाहनस्येव साम्राज्येऽवन्तिवर्मणः ।
अशेषप्राणिनामासीदमारो दशवत्सरान् ॥ ६४ ॥
जलं जन्तुभिः शिशिरं तटानित्याकुतोभयैः ।
तत्कालं सेवितः पृष्ठे पाठीनैः शरदातपः ॥ ६५ ॥
अनुग्रहाय लोकानां भट्टाः श्रीकल्लटादयः ।
अवन्तिवर्मणः काले सिद्धा भुवमवातरन् ॥ ६६ ॥
चरित्रे बहुवक्तव्ये येषामेकस्य पावनः ।
अयं प्रासङ्गिकः कश्चिद्वृत्तान्तो वर्णयिष्यते ॥ ६७ ॥
देशः प्रबलतोयोऽयं महापद्मसरोजलैः ।
कूलिनीभिश्च शवलः स्वल्पोत्पत्तिः सदाभवत् ॥ ६८ ॥
ललितादित्यभूभर्तुरुद्योगेन बलीयसा ।
किञ्चिदाकृष्टसलिलः प्रापोत्पत्तिं मनाक् ततः ॥ ६९ ॥
जयापीडे क्रमाद्याते स्वल्पवीर्येषु राजसु ।
सलिलोपप्लवैरासीत् पुनरिवावृता क्षितिः ॥ ७० ॥
दीन्नाराणां दशशती पञ्चाशत्यधिकाभवत् ।
धान्यखारीक्रये हेतुर्देशे दुर्भिक्षविक्षते ॥ ७१ ॥
अवन्तिवर्मणः पुण्यैर्जन्तूञ्जीवयितुं ततः ।
स्वयमन्नपतिः श्रीमान् सुय्यः क्षितिमवातरत् ॥ ७२ ॥
यस्याविज्ञातसंभूतेस्तूर्ये कालेऽपि निश्चितं ।

अयोनिजत्वं कृतिनश्चरितैर्भुवनाद्भुतैः ॥ ७३ ॥
पुरा रथ्यारजःपुञ्जं सम्मार्जन्ती पिधानवत् ।
सुय्याभिधाना चण्डाली मृद्भाण्डं प्राप नूतनं ॥ ७४ ॥
तस्मिन् पिधानमुद्धृत्य सापश्यन्मध्यशायिनं ।
बालं कमलपत्राक्षं धयन्तं स्वकराङ्गुलीः ॥ ७५ ॥
मात्रा कयापि त्यक्तोऽसौ सुन्दरो मन्दभाग्यया ।
अथेति चिन्तयन्त्यासीत् सा स्नेहात् प्रस्नुतस्तनी ॥ ७६ ॥
अदूषयन्त्याः स्पर्शेन धात्र्याः शूद्रस्त्रियो गृहे ।
तया विहितवृत्तिः स शिशुर्वृद्धिमनीयत ॥ ७७ ॥
स सुय्यनामा मतिमान् प्रवृद्धः शिक्षिताक्षरः ।
कस्याप्यासीद्गृहपतेरर्भकाध्यापको गृहे ॥ ७८ ॥
व्रतस्नानादिनियमैस्तं सतां हृदयङ्गमं ।
गोष्ठीषु विशदप्रज्ञं विदग्धाः पर्यवारयन् ॥ ७९ ॥
तेषां कथाव्यवस्थासु निन्दतां जलविप्लवं ।
धीरस्ति मे निरर्थस्तु किं कुर्यामिति सोऽब्रवीत् ॥ ८० ॥
उन्मत्तस्येव वदतस्तस्य तन्नियमाद्वचः ।
निशम्य भूभृच्चारेभ्यश्चिरमासीत् सविस्मयः ॥ ८१ ॥
ततस्तमानीय नृपः किं ब्रूष इति पृष्टवान् ।
धीरस्तीत्यादि राजाग्रेऽप्यवोचत् सोऽप्यसंभ्रमः ॥ ८२ ॥

वातूलोऽसाविति निर्निरुक्तोऽप्यथ महीपतिः ।
धियं दिदृक्षुर्विदधे तस्यायत्तं निजं धनं ॥ ८३ ॥
कोशाद्दीनारभाण्डानि वक्कुन्यादाय हेलया ।
ययौ मडवराज्यं स नावमारुह्य रंहसा ॥ ८४ ॥
ग्रामे तत्र प्रवृद्धाम्बुनिमग्ने नन्दकाभिधे ।
एकं निक्षिप्य दीनारभाण्डं व्यावर्तत द्रुतं ॥ ८५ ॥
सत्यं वातूल एवासौ सभ्येष्वपि वदत्स्वपि ।
वार्त्तां निशम्य तां राजा तन्निष्ठान्वेषकोऽभवत् ॥ ८६ ॥
क्रमराज्यं समं प्राप्य देशे यक्षदराभिधे ।
अञ्जलिभ्यां निचिक्षेप दीनारान् सलिलान्तरे ॥ ८७ ॥
यत्र तीरद्वयालम्बि शैलनिर्लुठिताः शिलाः ।
चक्रुर्वितस्तां निष्पीड्य पयः प्रतिपथोन्मुखं ॥ ८८ ॥
दुर्भिक्षोपहता ग्राम्या दीनारान्वेषिणस्तदा ।
शिलाः प्रवाहादुद्धृत्य वितस्तां समशोधयन् ॥ ८९ ॥
एवं दिनानि कतिचित् पयो युक्त्या विकृष्य तत् ।
वितस्तामेकतः स्थानात् कर्मकृद्भिरबन्धयत् ॥ ९० ॥
पाषाणसेतुबन्धेन सुय्येनाद्भुतकर्मणा ।
सप्ताहमभवद्बद्धा निखिला नीलजा सरित् ॥ ९१ ॥
अधः प्रवाहं संशोध्य लुठदश्मप्रतिक्रियां ।

कृत्वाबद्धैः शिलाबन्धैः सेतुबन्धमपाटयत् ॥ ९२ ॥
चिरकालनिरोधेन सोत्कण्ठेवाम्बुधिं प्रति ।
ततः प्रावर्तत जवाद्गन्तुं सागरगामिनी ॥ ९३ ॥
जम्बालाङ्का स्फुरन्मीना भूर्बभौ सलिलोज्झिता ।
व्यक्तकार्ण्या सनक्षत्रा निर्मेघेव नभस्थली ॥ ९४ ॥
यत्र यत्र विवेदौघवेधं सलिलविप्लवे ।
तत्र तत्र वितस्तायाः प्रवाहान् नूतनान् व्यधात् ॥ ९५ ॥
मूलस्रोतोग्रनिर्हूतभूरिस्रोता बभौ सरित् ।
एकभोगाश्रयानेकफणोद्भासितपन्नगी ॥ ९६ ॥
वामेन सिन्धुस्त्रिग्राम्या वितस्ता दक्षिणेन तु ।
यान्त्यौ ये समगंसातां प्राग्वैन्यस्वामिनोऽन्तिके ॥ ९७ ॥
वर्ततेऽद्य महानद्योः कल्पापायेऽप्यनत्ययः ।
संगमो नगरोपान्ते स सुय्योपक्रमस्तयोः ॥ ९८ ॥
अद्याप्यास्तां फलपुरपरिहासपुरस्थितौ ।
विष्णुस्वामी संगमस्य वैन्यस्वामी च तीरयोः ॥ ९९ ॥
सुन्दरीभवनाभ्यर्णप्राप्तस्याद्यतनस्य तु ।
योगशायी हृषीकेशस्सुय्यस्याभ्यर्चितस्तटे ॥ १०० ॥
दृश्यन्तेऽद्यापि सरितां पूर्वस्रोतस्तटोद्भवाः ।
निषादाकृष्टनौरज्जुरेखाङ्काजीर्णपादपाः ॥ १०१ ॥

स्फुरत्तरङ्गजिह्वाः स नदीर्भोगिमनिग्रहकृत् ।
तास्ताः स्वेच्छानुसारेण मान्त्रिकः पन्नगीरिव ॥ १०२ ॥
बद्ध्वा शैलमयान् सेतून् वितस्तां सप्तयोजनीं ।
महापद्मसरो वारि स चकार नियन्त्रितं ॥ १०३ ॥
महापद्मसरः कुण्डाद्वितस्ता येन योजिता ।
नवान्निर्याति कोदण्डयन्त्रादिषुरिवाधुना ॥ १०४ ॥
उद्धृत्य सलिलादुर्वीमिवमादिवराहवत् ।
अनेकजनसंकीर्णान् ग्रामान् नानाविधान् व्यधात् ॥ १०५ ॥
पालीभिरम्भः संरोध्य यान् कुण्डसदृशान् व्यधात् ।
कुण्डलानीति सर्वान्नसमृद्धान् ब्रुवते जनाः ॥ १०६ ॥
उत्खातकीलनिवहा नद्योऽद्यापि शरत्कृशाः ।
व्यञ्जन्ति जलगन्धेभबन्धनं स्तम्भसन्निभान् ॥ १०७ ॥
दीनारभाण्डानोत्कीत् स यदगाधजलान्तरे ।
नन्दके निर्गतजले स्थलान्तरात् तदलभ्यत ॥ १०८ ॥
अदेवमातृकान् ग्रामान् परीक्ष्य विविधाः क्षितीः ।
संविभेजे विभक्तेन नादेयेन स वारिणा ॥ १०९ ॥
असिञ्चच्च जलैर्ग्रामान् ग्रामान्मृदमुपाहृतां ।
या यावता क्षणेनागाच्छोषं तां तावता हृदि ॥ ११० ॥
कालेन मत्वा सेकार्हां प्रतिग्रामं जलस्रुतेः ।

परिमाणं विभागं च परिकल्प्य निरत्ययं ॥ १११ ॥
चकार चानूलाख्याभिः सिन्धुभिः सर्वतो दिशः ।
सत्फलोदारकेदारसंपत्संपन्नविभ्रमाः ॥ ११२ ॥ तिलकं ॥
न कश्यपेनोपकृतं न यत्संकर्षणेन वा ।
हेलया मण्डलेऽमुष्मिंस्तत् सुय्येन सुकर्मणा ॥ ११३ ॥
भूमेर्जलादुद्धरणं द्विजक्षेत्रे तथार्पणं ।
सेतुबन्धोऽश्मभिस्तोये यमनं कालियस्य च ॥ ११४ ॥
चतुर्षु सिद्धमिति यद्विष्णोः सत्कर्मजन्मसु ।
सुय्यस्य तत्पुण्यराशेरेकस्मिन्नेव जन्मनि ॥ ११५ ॥ युगलकं ॥
यस्मिन् महासुभिक्षेषु दीनाराणां शतद्वयी ।
धान्यखारी प्राप्तिहेतुरासर्गादभवत् पुरा ॥ ११६ ॥
ततः प्रभृति तत्रैव चित्रं कस्मीरमण्डले ।
षट्त्रिंशता धान्यखारी दीनारैरुदितः क्रयः ॥ ११७ ॥
निर्गताया महापद्मसलिलात् स्वर्गसन्निभं ।
वितस्तायास्तटे चक्रे स्वनामाङ्कं स पत्तनं ॥ ११८ ॥
सुकृता स्थापिता तेन सरसि व्याप्तदिक्तटे ।
आसंसारं स्थिरामारमर्यादा कपपक्षिणां ॥ ११९ ॥
सुय्याकुण्डलनामानं ग्रामं कृत्वा द्विजातिसात् ।
सुय्यामुद्दिश्य तन्नाम्ना सुय्यासेतुं स निर्ममे ॥ १२० ॥

तेनोद्धृतासु सलिलाद्भूषु ग्रामाः सहस्रशः ।
अवन्तिवर्मप्रमुखैर्जयस्थलमुखाः कृताः ॥ १२१ ॥
ईदृशैर्धर्म्यवृत्तान्तैः प्रवर्त्तितकृतोदयः ।
अवन्तिदेवः पाति स्म मान्धातेव वसुन्धरां ॥ १२२ ॥
प्राणप्रयाणसोद्योगरोगग्रस्तस्ततो ययौ ।
क्षेत्रं स त्रिपुरेशाद्रिनिष्ठज्येष्ठेश्वराश्रितं ॥ १२३ ॥
आत्मनस्तत्र निश्चित्य विपत्तिं चिरगोपितां ।
प्राणान्ते प्राञ्जलिः शूरो वैष्णवत्वमदर्शयत् ॥ १२४ ॥
तेनान्ते भगवद्गीताः शृण्वता भावितात्मना ।
ध्यायता वैष्णवं धाम निरमुच्यत जीवितं ॥ १२५ ॥
आषाढशुक्लपक्षस्य तृतीयस्यां क्षमापति ।
वर्षे एकोनषष्ठे स क्ष्मावृषाऽस्तमुपाययौ ॥ १२६ ॥
तस्मिन् प्रशान्ते प्रत्येकं विभवोत्सिक्तचेतसां ।
तुल्यमुत्पलवंश्यानां राज्येच्छा भूयसामभूत् ॥ १२७ ॥
ततश्चक्रे प्रतीहारः प्रयत्नाद्रत्नवर्धनः ।
नृपं शङ्करवर्माणमवन्तिनृपतेः सुतं ॥ १२८ ॥
कर्णपो विन्नपामात्यस्तनूजं शूरवर्मणः ।
तद्वेषात् सुखवर्माख्यं यौवराज्येऽप्ययोजयत् ॥ १२९ ॥
अतस्तयोरभूद्वैरं क्षितीशयुवराजयोः ।

यस्मिन् क्षणे क्षणे राज्यमासीद्दोलामिवाश्रयत् ॥ १३० ॥
शिवशक्त्यादयोवीराः स्वामिकार्योज्झितासवः ।
यत्राभूवन् स्वसत्त्वस्य परीक्षाक्षणलाभिनः ॥ १३१ ॥
कुर्वतां स्वामिशत्रूणां दानमानप्रतिश्रवं ।
सत्त्वैकाग्र्यान्न ते यस्मादानुकूल्यमशिश्रयन् ॥ १३२ ॥
पिण्डस्पृक्ता परित्यज्यालङ्कृताः शिक्षिताः क्वचित् ।
तावन्न वीततमसः श्ववृत्तिमनुजीविनः ॥ १३३ ॥
कथञ्चिदथ निर्जित्य युवराजं मह्कोजसं ।
प्राज्यः स्वविजयोङ्कारश्चक्रे शङ्करवर्मणा ॥ १३४ ॥
सम्राट् समरवर्माब्धैर्वितीर्णसमरोऽसकृत् ।
कीर्त्तिं श्रिया प्रणयिनीं लब्धयाधिविवेद सः ॥ १३५ ॥
अथ निर्जित्य दायादाल्लब्ध्वा लक्ष्मीं क्षितीश्वरः ।
जिष्णुर्दिग्विजयं कर्तुं श्रीमानासीन्मह्कोद्यमः ॥ १३६ ॥
तस्य कालवलाद्देशे प्रक्षीणजनसंपदि ।
लक्षाणि नवपत्तीनां क्षरान्निष्क्रमतोऽभवन् ॥ १३७ ॥
स्वपुरस्योपकण्ठेऽपि योऽभूत् कुण्ठितशासनः ।
स एव रत्नोत्तंसेषु राज्ञामाज्ञां न्यवेशयत् ॥ १३८ ॥
गच्छन्नाम्नायविच्छेदसंप्रदायः ककुब्जये ।
स्वप्रज्ञया समुन्नीतो राज्ञा शङ्करवर्मणा ॥ १३९ ॥

तत्सेनानरनाथानां पृतनाभिः पदे पदे ।
कुल्यापगेव कुल्याभिर्विशन्तीभिरवर्द्धत ॥ १४० ॥
दार्वाभिसारराजेन त्रस्यता समुपाश्रिताः ।
अद्रिद्रोण्यो न वाहिन्यस्तत्सेना नादमादधुः ॥ १४१ ॥
नवोल्वणैर्हरिगणैर्गृह्णन् हरिगणं क्षणात् ।
अनासादितदुर्गं स चक्रे दुर्गान्तरातिथिं ॥ १४२ ॥
लक्षाणि नवपत्तीनां वारणानां शतत्रयी ।
लक्षं च वाजिनामासीद्यस्य सेनापुरःसरं ॥ १४३ ॥
स गुर्जरजयव्यग्रः स्वपराभवशङ्किनं ।
त्रैगर्तं पृथिवीचन्द्रं निन्ये तमसि हास्यतां ॥ १४४ ॥
पुत्त्रं भुवनचन्द्राख्यं नीविं प्रागेव दत्तवान् ।
स ह्यभूत् प्रणतिं कर्तुं तस्याभ्यर्णमुपागतः ॥ १४५ ॥
अथ तत्कपटकं भ्राम्यद्भूरिमण्डलनायकं ।
वीक्ष्य सम्मुखमायान्तं महार्णवमिवोज्ज्वलं ॥ १४६ ॥
समागमक्षणे यस्माच्छङ्कमानः स्वबन्धनं ।
पलाय्य प्रययौ दूरं निर्वाणौजोविजृम्भितः ॥ १४७ ॥ तिलकं ॥
यमप्रतिमसौन्दर्यमख्याप्याङ्कः पुराविदः ।
तमेवाद्यानुरुन्धस्ता नृपाः कालमिवोल्वणं ॥ १४८ ॥
उच्चखानालखानस्य संख्ये गुर्जरभूभुजः ।

बद्धमूलां जणाल्लक्ष्मीं शुचं दीर्घामरोपयत् ॥ १४९ ॥
तस्मै दत्वा टक्कदेशं विनयादङ्गुलीमिव ।
स्वशरीरमिवापासीन्मण्डलं गुर्जराधिपः ॥ १५० ॥
ह्रतं भोजाधिराजेन स साम्राज्यमदापयत् ।
प्रतीहारतया भृत्यीभूते थक्कियकान्वये ॥ १५१ ॥
दरत्तुरुष्काधिपयोर्यः केशरिवराह्वयोः ।
हिमवद्विन्ध्ययोरासीदार्य्यावर्त इवान्तरे ॥ १५२ ॥
नक्षत्रेष्विव भूपेषु नभसीवोत्तरापथे ।
यस्यैव विपुला ख्यातिर्मार्तण्डस्येव मण्डलं ॥ १५३ ॥
स श्रीमाँल्लल्लियः शाहिरलखानाश्रयः क्रुधा ।
निराकरिष्णुः साम्राज्यात् तस्य सेवां न लब्धवान् ॥ १५४ ॥
एवं दिग्विजयं कृत्वा प्राप्तः स निजमण्डलं ।
प्रदेशे पञ्चसत्राख्ये स्वनाम्ना विदधे पुरं ॥ १५५ ॥
तस्य श्रीस्वामिराजस्य तनयोदकूपथप्रभोः ।
पूर्णिमेव जपाबन्धोः सुगन्धाख्याभवत् प्रिया ॥ १५६ ॥
तया समं पुरवरे सुरराजोपमो नृपः ।
तस्मिन् शङ्करगौरीशसुगन्धेशौ विनिर्ममे ॥ १५७ ॥
द्विजस्तयोर्नायकाख्यो गौरीशसुरसद्मनोः ।
चातुर्विद्यः कृतस्तेन वाग्देवीकुलमन्दिरं ॥ १५८ ॥

परकाव्येन कवयः परद्रव्येण चेश्वराः ।
निर्लोठितेन स्वकृतिं पुष्णन्त्यद्यतने क्षणे ॥ १५९ ॥
स्वल्पसत्त्वो नरपतिः स्वपुरख्यापनाय सः ।
सारापहारमकरोत् परिहासपुरस्य यत् ॥ १६० ॥
ख्यातिहेतुः पट्टवानां पशूनां क्रयविक्रयौ ।
इत्यादि यत्पत्तनेऽस्ति तत् तस्मिन् हि पुरेऽभवत् ॥ १६१ ॥
राज्यप्रदेन नृपतेरत्नवर्धनमन्त्रिणा ।
श्रीरत्नवर्धनेशाख्यो व्यधीयत सदाशिवः ॥ १६२ ॥
चित्रं नृपद्विपाः पूतमूर्तयः कीर्त्तिनिर्झरैः ।
भवन्ति व्यसनासक्तिपांशुस्नानमलीमसाः ॥ १६३ ॥
अथ क्रमेण नृपतिर्लोभाभ्यासेन भूयसा ।
आधीयमानचित्तोऽभूत् प्रजापीडनपण्डितः ॥ १६४ ॥
आरब्धैर्व्यसनैर्भूम्ना क्षीणकोशः क्षणे क्षणे ।
देवादीनां स सर्वस्वं जह्वारायामयुक्तिभिः ॥ १६५ ॥
कर्मस्थाने पुरगृहग्रामादिधनहारिणा ।
तेनाट्टपतिभागाख्यगृहकृत्याभिधे कृते ॥ १६६ ॥
धूपचन्दनतैलादिविक्रयोत्थं समादधे ।
हविर्णां देववेश्मभ्यः क्रयमूल्यकला हलात् ॥ १६७ ॥
प्रत्यवेक्षां मुखे दत्वा विभक्तैरधिकारिभिः ।

चतुःषष्टिं सुरगृहान् मुमोषेतरदञ्जसा ॥ १६८ ॥
ग्रामान् देवगृहग्राह्यान् राजा प्रतिकरेण सः ।
स्वयं स्वीकृत्य चोत्पत्तिं क्ष्मां कार्षक इव व्यधात् ॥ १६९ ॥
तुलां कृत्वा त्रिभागोनां वर्षदेयां सपर्षदे ।
भुक्तिकम्बलमूल्यादिदम्भादप्यधिकं ददौ ॥ १७० ॥
दिगन्तरस्थो ग्रामीणानूढभारानानागतान् ।
तद्देशार्घ्यैर्भारमूल्यं वर्षमेकमदण्डयत् ॥ १७१ ॥
वर्षेऽपरस्मिन् निखिलान् भारमूल्यं निरागसः ।
तयैव संख्यया ग्राम्यान् प्रतिग्राममदण्डयत् ॥ १७२ ॥
इत्येषा व्यूढभारोढिः प्रथमं तेन पातिता ।
दारिद्र्यदूतीग्रामीणां या त्रयोदशधा स्थिता ॥ १७३ ॥
स्कन्दकग्रामकायस्थमासवृत्त्यादिसंग्रहैः ।
अन्यैश्च विविधायासैर्व्यधाद्ग्रामान् स निर्धनान् ॥ १७४ ॥
तुलापहारोपचयग्रामदण्डादिधिसंग्रहैः ।
इत्येष तेन संवाहो गृहकृत्ये प्रवर्तितः ॥ १७५ ॥
व्यधत्त पञ्च शिविरान् स तस्मिन् भिन्नकर्मणि ।
षष्ठं तथा गञ्जवरं शकचं लवटाभिधं ॥ १७६ ॥
आत्मनो निरयं मूढः सोऽङ्गीकृत्येत्युपक्रियां ।
भाविनामकरोद्राज्ञां पापीयस्त्वानियोगिनाम् ॥ १७७ ॥

निमित्तं मण्डलेऽमुष्मिन् सविद्यानामनादरे ।
राज्ञां प्रतापहानौ च नान्यः शङ्करवर्मणः ॥ १७८ ॥
मुख्येन गुणिनां राज्ञां धनहान्या प्रथापहा ।
मूर्खेण येन कायस्था दास्याः पुत्राः प्रवर्तिताः ॥ १७९ ॥
तथा कायस्थभोज्या भूर्जाता तत्प्रात्यवेक्षया ।
यथा संजायते वर्णहरणादिव भूभुजां ॥ १८० ॥
तस्मिन् घोरे प्रजादुःखे कृपार्द्रः पृथिवीपतिं ।
पुत्रो गोपालवर्माख्यः कदाचिदिदमब्रवीत् ॥ १८१ ॥
प्रदातुस्तात भवतः पूर्वं न्यासीकृतः स्थितः ।
वरो यः सत्यसन्धस्य सोऽधुना प्रार्थ्यते मया ॥ १८२ ॥
कायस्थप्रेरणादेतैर्देवेनाद्य प्रवर्तितैः ।
आयासैः श्वासशेषैव प्राणवृत्तिः शरीरिणां ॥ १८३ ॥
न च नामास्ति तातस्य काचिल्लोकद्वयोचिता ।
मनागपि हितप्राप्तिरेतयां जनपीडया ॥ १८४ ॥
अदृष्टविषयां वार्तां गच्छतां विवृणोति कः ।
दृष्टेऽप्यनिष्टादन्यन्न कर्मणा तेन दृश्यते ॥ १८५ ॥
एकतो व्याधिदुर्भिक्षप्रमुखा विपदोऽखिलाः ।
प्रजानामेकतस्त्वेका लुब्धता वसुधापतेः ॥ १८६ ॥
भूभुजोऽभ्यस्तलोभस्य श्रीः कैश्चिन्नाभिनन्द्यते ।

अकालकुसुमस्येव फलसंभावनोज्झिता ॥ १८७ ॥
दानं च सूनृता सूक्तिर्विश्वसंवननं प्रभोः ।
लोभः पूर्वं तयोरेव विनाशाय महोद्यमः ॥ १८८ ॥
प्रतापमायतिं शोभां हेमन्ताहस्य वारिदः ।
स्मृतिशेषां करोत्येव लोभश्च पृथिवीभुजां ॥ १८९ ॥
दायादाव्ययभीरुतापरिहृतारब्धैर्भवत्युन्नता
भृत्याः प्रत्युपकारकातरमतेः कुर्युर्न केऽपि प्रियं ।
राशीभूतधनस्य जीवितहृतौ शश्वद्यतेरन् निजा
भूभर्तुः क्रियते द्विषेव रभसाल्लोभेन किं नाप्रियं ॥ १९० ॥
राजसंवाहनामायं नवायासो जनासुहृत् ।
तदेष लोभप्रभवः प्रजानाथ निवार्यतां ॥ १९१ ॥
श्रुत्वेति राजपुत्रस्य सौजन्येनोज्ज्वलं वचः ।
स्मितधौताधरो राजा शनैर्वचनमब्रवीत् ॥ १९२ ॥
तवाकृत्यविसंवादि वचः सौजन्यपेशलं ।
स्मारयत्यद्य मामेतच्चित्तवृत्तिं पुरातनीं ॥ १९३ ॥
कुमारभावे पूर्वं मे तवेवार्द्रान्तरात्मनः ।
प्रजावत्सलता वत्स पर्याप्ता पर्यवर्धत ॥ १९४ ॥
सोऽहं घर्मे वहन् वर्म शीतेऽद्वोष्णामंशुकं ।
पदातिरपपादत्रः पित्रा संचारितोऽभवं ॥ १९५ ॥

मृगव्याधा इवैः सार्द्धमटन्तं कण्टकक्षतं ।
अन्तर्वाष्पं मां विलोक्य तमसूयिषुरग्रगाः ॥ १९६ ॥
स तानुवाच सामान्यो भूत्वाहं राज्यमाप्तवान् ।
काले काले सेवकानां ज्ञाने सेवापरिश्रमं ॥ १९७ ॥
ईदृग्दुःखमयं भुक्त्वा ज्ञास्यत्यन्यव्यथां ध्रुवं ।
प्राप्तैश्वर्यो भवेन्मूढो गर्भेश्वरस्तथान्यथा ॥ १९८ ॥
उपायैरीदृशैर्योऽहं कृतः पित्रा सुसिक्षितः ।
तेनापि प्राप्तराज्येन मयैवं पीडिताः प्रजाः ॥ १९९ ॥
गर्भवासव्यथां ज्ञातः शरीरी विस्मरेद्यथा ।
प्राप्तराज्यस्तथा राजा नियतं पूर्वचिन्तनं ॥ २०० ॥
त्वयैव तस्मादेकोऽद्य वरो मह्यं प्रदीयतां ।
प्राप्तराज्यः प्रजापीडां माकार्षीस्त्वमतोऽधिकां ॥ २०१ ॥
सासूयमिति तेनोक्तः कृतान्योन्यस्मितैर्विटैः ।
राजाप्तैर्वीक्षितश्चासीत् कुमारो ह्रीनताननः ॥ २०२ ॥
त्यागभीरुतया तस्मिन् गुणिसङ्गपराङ्मुखे ।
आसेवन्तावरावृत्तीः कवयो भल्लटादयः ॥ २०३ ॥
निर्वेतनाः सुकवयो भारिकोलवटस्त्वभूत् ।
प्रसादात् तस्य दीन्नारसहस्रद्वयवेतनः ॥ २०४ ॥
कल्यपालकुले जन्म तत् तेनैव प्रमाणितं ।

क्षीवोचितापभ्रंशोक्तैर्दैवीवाग्यस्य नाभवत् ॥ २०५ ॥
वेष्टितश्मश्रुरुष्णीषा घ्राणस्याग्रे प्रदेशिनी ।
ध्यानैकाग्रा दृगित्यासीत् सुखराजस्य मन्त्रिणः ॥ २०६ ॥
योऽयमाययेन्चितोवेशो दुर्नयासेविनः प्रभोः ।
छन्दानुवृत्त्या स प्राप नटस्येव विडम्बनां ॥ २०७ ॥ युग्मं ॥
सोऽनुगैः सह निर्द्रोहं जघान द्रोहशङ्कया ।
शूरं दार्वाभिसारेशं शर्वर्यां नरवाहनं ॥ २०८ ॥
प्रजाभिशापे पतिते नृपस्योन्मार्गवर्त्तिनः ।
त्रिंशद्दिंशाः सुतास्तस्य व्यपद्यन्तामयं विना ॥ २०९ ॥
वंशः श्रीर्जीवितं दारा नामापि पृथिवीभुजां ।
क्षणादेवं क्षयं याति प्रजाविप्रियकारिणां ॥ २१० ॥
इत्युक्तं वक्ष्यते चाग्रे व्यक्तमेतत् तु चिन्त्यतां ।
प्रनष्टं तस्य नामापि यथा क्रूरेण कर्मणा ॥ २११ ॥
नाम्ना पत्तनमित्येव प्रख्यातं स्वपुरं कृतं ।
कस्यान्यस्याभिधाध्वंसि यथा शङ्करवर्मणः ॥ २१२ ॥
स्वस्त्रीयः सुखराजस्य तेन द्वाराधिपः कृतः ।
वीरानकाभिधे स्थाने प्रमादादासदद्वधं ॥ २१३ ॥
तत्कोपात् स स्वयं राजा दत्तयात्रो मदोर्जितः ।
वीरानकं समुन्मूल्य प्रविवेशोत्तरापथं ॥ २१४ ॥

सिन्धुकूलाश्रयान् देशान् जित्वा भूरीन् भयातुरैः ।
कृताननतिर्महीपालैः प्रत्यावृत्तोऽभवत् ततः ॥ २१५ ॥
उरशां विशतस्तस्य वास्तव्यैरौरशैः समं ।
निकेतहेतोः सैन्यानामकस्मादुदभूत् कलिः ॥ २१६ ॥
गिरिशृङ्गाधिरूढेन श्वपाकेन निपातितः ।
वेगवाही शरस्तस्य प्रमादादविशद्गलं ॥ २१७ ॥
मुमूर्षुराप्तान् कठकं संरक्ष्य नयतेति सः ।
उक्त्वा कर्णारिथारूढः स्थानात् तस्माद्विनिर्ययौ ॥ २१८ ॥
हीनदर्शनसामर्थ्यः परिज्ञाय शनैर्गिरा
क्रन्दन्त्या वपुरालिंग्य स्थितायाः क्षामभाषितः ॥ २१९ ॥
पुत्रं गोपालवर्माख्यं न्यासीकृत्य च रक्षितुं ।
शिशुदेश्यं महादेव्याः सुगन्धाया अबान्धवं ॥ २२० ॥
फाल्गुणे कृष्णसप्तम्यां वत्सरे सप्तसप्ततौ ।
उत्खायमानविशिखो मार्ग एव व्यपद्यत ॥ २२१ ॥ तिलकं ॥
सुखराजादयः सैन्यं रक्षन्तः परभूमिषु ।
वृत्तान्तैर्गोपयन्तस्तं यान्त एवाभवन् पथि ॥ २२२ ॥
तं यन्त्रसूत्रैस्ते मूर्द्ध्नां नम्रतोन्नमतावहैः ।
प्रतिप्रणामं प्राप्तानां सामन्तानामकारयन् ॥ २२३ ॥
षड्भिर्दिनैर्निजे स्थाने प्राप्ते वोल्लासकाभिधे ।

चक्रिरे गतसन्त्रासास्ततस्तस्यान्तसत्क्रियां ॥ २२४ ॥
तिस्रः सुरेन्द्रवत्याद्या राज्ञ्यो राजानमन्वयुः ।
वालावितुः कृतज्ञश्च जयसिंहाह्वयः कृती ॥ २२५ ॥
द्वौ लाडोवज्रसारश्च तं भृत्यावनुजग्मतुः ।
इति सद्भिश्चितारूढैः सह्यसाक्रियताग्निसात् ॥ २२६ ॥
ततो जुगोप गोपालवर्मा धार्मिकतोज्ज्वलः ।
सुगन्धया पाल्यमानः सत्यसन्धो वसुन्धरां ॥ २२७ ॥
मध्ये लालितकादीनां दुर्वृत्तानां वसन्नपि ।
अनतिक्रान्तबाल्योऽपि दुःसंस्कारान् न सोऽग्रहीत् ॥ २२८ ॥
भूपालजननी भोगैर्वैधव्येऽधिकमुन्मदा ।
सा प्रभाकरदेवाख्यमचीकमत मन्त्रिणं ॥ २२९ ॥
तया निर्भरसंभोगप्रीतया स व्यधीयत ।
सौभाग्यपदशृङ्गारमौलिचक्रत्रयाङ्कितः ॥ २३० ॥
कोशाध्यक्षेण राज्ञ्यास्तस्या लुण्ठितसंपदा ।
तदा भाण्डापुरे तेन शाहिराज्यं व्यधीयत ॥ २३१ ॥
आज्ञातिक्रमिणः शाहेः कृत्वा कमलकाभिधं ।
तोमराणाय स प्रादाद्राज्यं लल्लियसूनवे ॥ २३२ ॥
प्रत्यावृत्तोऽथ नगरं विवेस विजयोर्जितः ।
शौर्यशृङ्गारवसतौ साभिमानः स्वविग्रहे ॥ २३३ ॥

स राजजननीजारः साहंकारो जयार्जनात् ।
मानच्युतिमधित्तैपैर्वीराणां व्यधितान्वहं ॥ २३४ ॥
क्षुद्रेण कामिना वेश्यावेश्मनीव नृपास्पदे ।
तेनावृते संप्रवेशो नाभूदन्यस्य कस्यचित् ॥ २३५ ॥
शनैर्विज्ञातवार्तस्य धनमानापहारकृत् ।
सोऽभूद्द्विगतोऽत्यर्थं राज्ञोगोपालवर्मणः ॥ २३६ ॥
विद्यते यन्न गञ्जेऽस्मिंस्तत्सर्वं शाहिविग्रहे ।
गतमित्यब्रवीद्रूपं स कोषगणनोद्यतं ॥ २३७ ॥
अथ गञ्जाधिपो राजभीतः खर्खोदवेदिनं ।
रामदेवाह्वयं बन्धुमभिचारमकारयत् ॥ २३८ ॥
तयाभिचारक्रियया भुक्तभूर्वत्सरद्वयं ।
गोपालवर्मनृपतिर्जातदाहो व्यपद्यत ॥ २३९ ॥
व्यक्तीभूतकुकर्मा स राजदण्डभयाकुलः ।
रामदेवोऽबधीत् पापः स्वयमेव स्वविग्रहं ॥ २४० ॥
रथ्यागृहीतो गोपालवर्मभ्राताथ सङ्कटः ।
बभूव प्राप्तराज्यः स दशभिर्दिवसैर्व्यसुः ॥ २४१ ॥
अथ वंशक्षये वृत्ते राज्ञः शङ्करवर्मणः ।
प्रजाप्रार्थनया राज्यं सुगन्धा विदधे स्वयं ॥ २४२ ॥
गोपालपुरगोपालमठगोपालकेशवान् ।

सा पुरं च स्वनामाङ्कं विदधे धर्मवृद्धये ॥ २४३ ॥
गोपालवर्मणो जाया नन्दानिन्ध्यान्वयोद्भवा ।
शिशुरप्यभवन्नन्दा मठकेशवधारिणी ॥ २४४ ॥
अन्तर्वत्न्याः क्षणे तस्मिन् पत्न्या गोपालवर्मणः ।
जयलक्ष्म्यां बबन्धास्थां श्वश्रूः सन्तानकाङ्क्षिणी ॥ २४५ ॥
तस्यां विपन्नापत्यायां प्रसवान्तेऽतिदुःखिता ।
साभूदन्वयिने राज्यं कस्मैचिद्दातुमुद्यता ॥ २४६ ॥
तस्मिन् काले मह्नीपालविग्रहानुग्रहक्षमं ।
तत्र तत्र पदातीनां कृत्यसंहत्यभूत् कुलं ॥ २४७ ॥
ततः समाश्रितैकाङ्गा स्वयं संवत्सरद्वयं ।
सुगन्धा विदधे राज्यं समन्त्रिवेन तन्त्रिणां ॥ २४८ ॥
योग्याय दातुं साम्राज्यं कस्मैचित् सा किलैकदा ।
मन्त्राय मन्त्रिसामन्तात् तन्त्र्यैकाङ्गानढौकयत् ॥ २४९ ॥
अवन्तिवर्मवंशान्ते नप्तारं शूरवर्मणः ।
गर्गायाः स्वकुटुम्बिन्याः संजातं सुखवर्मणा ॥ २५० ॥
अनुव्रतो मे संबन्धिस्नेहादेवं भवेदिति ।
राज्ये निर्जितवर्माख्यं कर्तुं तस्या मनोऽभवत् ॥ २५१ ॥ युग्मं ॥
तया तद्वृत्तं विषयव्यसनित्वेन जागरात् ।
रात्रौ दिवाशयतया योऽप्यनुत्थानदूषितः ॥ २५२ ॥

नाम पङ्गुरिति प्राप राज्ये का तस्य योग्यता ।
इत्युदीर्याभवन् घ्नन्तो यावत् केचन मन्त्रिणः ॥ २५३ ॥
संहतैर्भेदनिर्यातैस्तावन्निर्जितवर्मजः ।
दशवर्षः कृतो राजा पार्थस्तंत्रिपदातिभिः ॥ २५४ ॥ तिलकं॥
ते गङ्गाधिपवाक्यानां सुगन्धोत्पाटनात् कृतं ।
प्रायश्चित्तममन्यन्त मानन्नतिविधायिनां ॥ २५५ ॥
सा राजधान्याः साम्राज्यपरिभ्रष्टा विनिर्ययौ ।
कृताधिकारा न्हारस्य पतितैर्बाष्पविन्दुभिः ॥ २५६ ॥
शरणं प्रत्यभाद्भृत्यो यो यस्तस्याः क्रमागतः ।
तं तमैक्षिष्ट निर्यान्ती विपन्नैः सह संगतं ॥ २५७ ॥
वर्षे एकोननवते संभूयैकाङ्गसैनिकाः ।
गत्वा सुगन्धामानिन्युः पुनर्हुष्कपुरे स्थितां ॥ २५८ ॥
तामापतन्तीमाकर्ण्य पार्थानुग्राहका मदात् ।
चैत्रान्ते तन्त्रिणः सर्वे निर्ययुः समरोन्मुखाः ॥ ३५९ ॥
ते जित्वा नवते वर्षे वैशाखे भिन्नसंहतीन् ।
एकाङ्गान् व्यूढसंघातान् बबन्धुस्तां पलायितां ॥ २६० ॥
निष्पालकविहारान्तस्तैर्बद्धा सा व्यपद्यत ।
अनित्यपतनोच्छ्राया विचित्रा भाग्यवृत्तयः ॥ २६१ ॥
अस्मिन् धनजनक्षैण्यनिमित्तं मण्डलोत्तमे ।

सर्वतो दिक्षमुक्तस्थावथानर्थपरम्परा ॥ २६२ ॥
जनकः पालको भूत्वा पङ्गुर्बालस्य भूपतेः ।
सामात्योऽपीडयल्लोकमुत्कोचग्रहतत्परः ॥ २६३ ॥
भूभुजो ग्रामकायस्था इवान्योन्यविपाटनं ।
दत्ताधिकाधिकोत्कोचा विदधुस्तन्निसेवया ॥ २६४ ॥
यज्ञैः कान्यकुब्जाद्या विलब्धास्तत्र मण्डले ।
तन्निणां कुण्डकादानाद्भुजां जीविकाभवत् ॥ २६५ ॥
विष्णुः पुराणाधिष्ठाने मेरुवर्धनमन्त्रिणा ।
श्रीमेरुवर्धनस्वामिनामा येन व्यधीयत ॥ २६६ ॥
तदात्मजाः क्षणे तस्मिन् गच्छन्तोऽच्छचाक्रिकाः ।
चक्रुर्निगूढराज्येच्छाः प्रजायासैर्धनार्जनं ॥ २६७ ॥ युग्मं ॥
सार्धं सुगन्धादित्येन गूढं शङ्करवर्मनः ।
तेषां ज्येष्ठो बह्वसख्यो मुमोष नृपमन्दिरं ॥ २६८ ॥
क्षीणप्रजे क्षणे तस्मिन् क्षारपात इव क्षते ।
उद्दीपः प्लाविताशेषशरच्छालिरजृम्भत ॥ २६९ ॥
खार्यां सहस्रक्रेयायां दुर्लभे भोजनेऽभवत् ।
वर्षे त्रिनवते घोरे दुर्भिक्षेण जनक्षयः ॥ २७० ॥
शवैश्चिरप्रविष्टाम्बुसंसेकोच्छूनविग्रहैः ।
वितस्ता सर्वतश्छन्ना दुर्लक्ष्यसलिलाभवत् ॥ २७१ ॥

विश्वतोऽस्थिमये जाते नैविद्यात् क्षितिमण्डले ।
सर्वभूतभयादासि श्मशानैक्यमजायत ॥ २७२ ॥
मद्यार्घधान्यसंभारविक्रयप्राप्तसंपदः ।
मन्त्रिणः क्ष्मापतेः प्रापुस्तन्त्रिणश्च धनाढ्यतां ॥ २७३ ॥
आदेयः क्ष्माभुजः सोऽभून्मन्त्री यस्तादृशीः प्रजाः ।
विक्रीय वाढ्यन्नासीत् तन्त्रिणां कुण्डिकाधनं ॥ २७४ ॥
अटव्यां वृष्टिसंपाते वातवर्षैरुपद्रुतं ।
वह्निः सर्वं जनं पश्यन् कश्चित् प्राप्तोष्णमन्दिरः ॥ २७५ ॥
यथा तथा जनं दुःस्थं वीक्ष्य कापुरुषश्चिरं ।
राजधानीस्थितः पङ्गुः स्वसुखं बह्वमन्यत ॥ २७६ ॥ युग्मं ॥
तुञ्जीनचन्द्रापीडादिप्रजापालप्रियाः प्रजाः ।
एवं तस्मिन् क्षणे नीताः संक्षयं राजराक्षसैः ॥ २७७ ॥
प्रापुश्चिरमवस्थानं पार्थिवा न तदा क्वचित् ।
धारासंपातसंभूताद्बुद्बुदा इव दुर्दिने ॥ २७८ ॥
पार्थः पितरमुत्पाद्य कदाचित् प्राभवत् स्वयं ।
कदाचित् सुतमुत्पाद्य तन्त्रिचक्रिकयाप्यभूत् ॥ २७९ ॥
अप्रीणयत् पङ्गुबधूवडवामण्डलं युवा ।
सुगन्धादित्यवीजाख्यो व्यवायविधिसवया ॥ २८० ॥
राज्यावप्यटदेव्याः स निर्दयैः सुरतोत्सवैः ।

खण्डयामास कण्डूतिं साप्यस्यार्थैषणां धनैः ॥ २८१ ॥
भगिनीभगसौभाग्यबद्धराग्याः स्वयं ददुः ।
यां पङ्क्वे मनोज्ञाङ्गीं मेरुवर्धनसूनवः ॥ २८२ ॥
सुगन्धादित्यमौत्सुक्यात् सापि देवी मृगावती ।
स्वयं संबुभुजेऽभ्यर्थकान्ताकामितकामिनी ॥ २८३ ॥
पर्यायेणाभवद्भृत्यः स तयोर्भोगवृद्धये ।
दरिद्रयोषितोरेकं भुक्तिपात्रमिवान्वहं ॥ २८४ ॥
पुत्रयोराज्यलाभाय स्पर्द्धयाभ्यां स्वमन्त्रिणे ।
दत्ता निधुवनश्रद्धा धनदानैः सदक्षिणा ॥ २८५ ॥
अथ पार्थं समुत्पाद्य तत्पिता पङ्गुराश्रितः ।
तन्त्रिभिः सप्तनवते वर्षे पौषेऽभिषेचितः ॥ २८६ ॥
माघेऽष्टानवते वर्षे सोऽभिषिच्य शिशुं सुतं ।
चक्रवर्माभिधं राज्ये क्षीणपुण्यो व्यपद्यत ॥ २८७ ॥
पैतृकं वाञ्छतो राज्यं पार्थस्यानुचरा व्यधुः ।
एकाङ्गैः सह संग्रामं तत्र तन्त्रिपदातयः ॥ २८८ ॥
मातुर्बप्पटदेव्याः स कञ्चित् कालं शिशुर्नृपः ।
मातामह्याः क्षिल्लिकायाः पाल्यस्त्वासीत् समा दश ॥ २८९ ॥
बाल्यादव्यक्तदोःशील्ये तस्मिंस्तत्पालनं तयोः ।
निर्दोषमासीदण्डस्थफणिलालनसन्निभं ॥ २९० ॥

ज्ञातः पङ्गोर्मृगावत्यां नवमेऽब्देऽथ मन्त्रिभिः ।
चक्रवर्माणमुत्पाट्य शूरवर्मा नृपः कृतः ॥ २११ ॥
निःस्नेहा मातुलामात्याः प्रययुः स्वार्थतत्पराः ।
अदत्वा तन्त्रिणां देयं तस्योत्पाटनहेतुतां ॥ २१२ ॥
अदुर्वृत्तोऽपि स क्ष्माभृद्विना भूरिधनार्पणं ।
गुणवानिव वेश्यानां तन्त्रिणां नाभवत् प्रियः ॥ २१३ ॥
वर्षे गते तमुत्पाट्य दृष्टोत्पत्तितया नृपं ।
बह्वर्थदं पुनः पार्थं व्यधुस्तन्त्रिपदातयः ॥ २१४ ॥
अभूत् साम्बवती वेश्या साम्बेश्वरीवधायिनी ।
पार्थप्रिया तन्त्रिचक्रसंग्रहे ज्ञातचक्रिका ॥ २१५ ॥
कालापेक्षी चक्रवर्मा ततोऽप्यैच्छद्धनं बहु ।
एकादशाब्दस्याषाढे कृतो भूयोऽपि तन्त्रिभिः ॥ २१६ ॥
पार्थादीन् यैः समुत्पाट्य भुक्तं चक्रिकया पुरा ।
तैस्तैः स्थानैश्च ये तेभ्यो जीवनाद्युपलेभिरे ॥ २१७ ॥
पिता भ्राता च यैरस्य राज्यादुत्पाटितोऽभवत् ।
संबन्धिभ्योऽपि यैर्दुग्धं कन्यां दत्वेतरेतरं ॥ २१८ ॥
अकरोद्दृष्टदोषाणां तेषामेव स नष्टधीः ।
मेरुवर्धनपुत्त्राणामधिकारसमर्पणं ॥ २१९ ॥ तिलकं ॥
कृतोऽक्षपटलाधीशस्तेन शङ्करवर्धनः ।

गृहकृत्येऽप्यसत्कृत्यो दाम्भिकः शम्भुबर्धनः ॥ ३०० ॥
पौषे तस्यैव वर्षस्य धनाभावात् स तन्त्रिणां ।
अदत्तकुण्डिकादेयः पलायिष्ट भयाकुलः ॥ ३०१ ॥
स्थिते मडवराज्यान्तस्तस्मिन् शङ्करवर्धनः ।
राज्यार्थी तन्त्रिणां द्रूतं प्राहिणोच्छम्भुबर्धनं ॥ ३०२ ॥
आवर्जितैः स निखिलैरधिकोत्कोचचर्चया ।
वञ्चयित्वाग्रजं राज्ये तैः स्वमेवाभ्यषेचयत् ॥ ३०३ ॥
तीर्थस्थितः स्वकुलजां तिमिरत्ति भुंक्ते
मौनी वकस्तिमिमुपेत्य वनान्तवासी ।
व्याधा निहन्ति तु वकं प्रभवन्ति ते ते
पात्राण्युपर्युपरि वञ्चनचञ्चुतायाः ॥ ३०४ ॥
भ्रष्टश्रीश्चक्रवर्माथ निशि श्रीत्वक्रवासिनः ।
एकदा डामराग्र्यस्य संग्रामस्याविशद्गृहं ॥ ३०५ ॥
ज्ञात्वा कान्तिविशेषेण राजानं स कृताञ्जलिः ।
प्रणम्य ग्राहयामास संभ्रमान्निजमासनं ॥ ३०६ ॥
राज्यभ्रंशादिवृत्तान्तमुक्त्वा साहायकार्थिनं ।
तं विपत्पेशलं प्रह्वो विचिन्त्योवाच डामरः ॥ ३०७ ॥
तन्त्रिणां वा तृणानां वा राजन् का गणना रणे ।
त्वत्सेवनार्थं सामर्थ्यं कस्मिन् न मम कर्मणि ॥ ३०८ ॥

प्राप्तोत्साहः पुनर्नूनमस्मानेवं हनिष्यसि ।
विस्मरन्त्युपकारं हि कृतकार्या महीभुजः ॥ ३०९ ॥
ऊर्द्धारोहे य आलम्बहेतुर्भूभृच्छिनत्ति तं ।
कुठारिकस्तरुस्कन्धमिवाधोगमनोन्मुखः ॥ ३१० ॥
धीधैर्यादिप्रकर्षेण येनोपक्रियते नृपः ।
प्राप्तोदयः स तेनैव शंक्यं वेत्त्युपकारिणं ॥ ३११ ॥
अस्मिन् स्थिते विपद्भूदिति संचिन्त्य वर्ज्यते ।
मूढैः परिवृढैरापत्सेवको मङ्गलेच्छुभिः ॥ ३१२ ॥
संपद्यापत्सहायस्य विस्मृतोपक्रिया नृपाः ।
मध्ये प्रमादस्खलितमुत्पन्नं हृदि कुर्वते ॥ ३१३ ॥
आमयार्तिरिपुत्रासनुदादौ दृष्टवैकृतान् ।
लब्धोदया ह्रीभयेन क्ष्मापा घ्नन्त्यनुयायिनः ॥ ३१४ ॥
राज्ञः सतोऽपि नाश्वासो यस्येभस्येव कर्णयोः ।
अविशुद्धप्रकृतयो ध्वनन्ति मधुपा इव ॥ ३१५ ॥
दिवसे सन्निधानेन पिशुनप्रेरणा प्रभोः ।
ईर्ष्यालुना स्वैरिणीव रक्षितुं यदि पार्यते ॥ ३१६ ॥
राजन् रजन्युपाध्यायो देवी यच्छिक्षयेद्रहः ।
तत्र प्रजागरः कर्तुमसर्वज्ञैर्न शक्यते ॥ ३१७ ॥
कथञ्चिदङ्घ्रि हृदये कुशलैर्विनिवेशिता ।

शिक्षा गौरवरेणेव राज्ञा विस्मार्यते निशि ॥ ३१८ ॥
न के लोभं समुत्पाद्य जिह्वया स्निग्धदीर्घया ।
पिपीलिका इव ग्रस्ताः क्ष्मापालैः शल्यकैरिव ॥ ३१९ ॥
जानाति हन्तुं हन्तव्यमासन्नं न तु दूरगं ।
एको वकः परः सत्यं द्रोहवृत्तिर्महीपतिः ॥ ३२० ॥
न नाम कण्टकाकीर्णाः कौटिल्यं लक्ष्यतां नयेत् ।
कालापेक्षी क्षितिपतिः शरीरमिव जार्यकः ॥ ३२१ ॥
नमन्नपि हरिर्हन्यादाश्लिष्यन्नपि पन्नगः ।
विहसन्नपि वेतालः स्तुवन्नपि महीपतिः ॥ ३२२ ॥
अद्रोहवृत्त्या तस्मात् त्वं रक्ष्यस्यस्मान् सदा यदि ।
ससैन्यस्ते तदेषोऽहं प्रातरेव पुरःसरः ॥ ३२३ ॥
तदाकर्ण्याब्रवीद्राजा लज्जास्मितसिताधरः ।
स्वात्मेव यूयं संरक्ष्या मम पूर्वोपकारिणः ॥ ३२४ ॥
ततो निक्षिप्य चरणं रक्ताक्ते मेषचर्मणि ।
कोशं चक्रतुरन्योन्यं सखड्गौ नृपडामरौ ॥ ३२५ ॥
अथ संघटितासंख्यचण्डडामरमण्डलः ।
चक्रवर्माकरोद्यात्रां प्रत्यूषे नगरोन्मुखः ॥ ३२६ ॥
तस्मिन् क्षणे पुरस्कृत्य योद्धुं शङ्करवर्धनं ।
विनिर्ययुः सिताष्टम्यां चैत्रे तान्त्रिपदातयः ॥ ३२७ ॥

कालानुवृत्तिप्रच्छन्नं तेषां संभावनोज्झितं ।
स तत्परे पुरस्कर्तुं चक्रवर्मा स्व विक्रमं ॥ ३२८ ॥
अथ प्रवृत्ते संग्रामे घोरे पद्मपुराद्बहिः ।
जघान प्रेरितस्तस्य पूर्वं शङ्करवर्धनं ॥ ३२९ ॥
हते सेनाधिपे तत्र शतधा तंत्रिवाहिनी ।
प्रययौ पवनाघातप्रेरिता नौरिवार्णवे ॥ ३३० ॥
पृष्ठानुसारिणोद्युक्तो नृपस्तेषामपाहरत् ।
गतिं तुरगवेगेन शिरःश्रेणीं तथासिना ॥ ३३१ ॥
भ्रमतः समरे बभ्रुर्वीरिपट्टाश्चलच्छटाः ।
चक्रवर्ममृगेन्द्रस्य सटापाटलविभ्रमं ॥ ३३२ ॥
किमन्यत् पञ्चषाण्यासन् सहस्राणि रणाङ्गने ।
पतितानि क्षणादेव हतानां तत्र तन्त्रिणां ॥ ३३३ ॥
तन्त्रिणो रणसंरम्भपरिश्रान्ताः क्षमातले ।
गृध्रपक्षकृतच्छाये शायिताश्चक्रवर्मणा ॥ ३३४ ॥
विशुद्धवंश्यैर्गुणिभिर्निहतैः संश्रितैः समं ।
अभूषयद्वीरशय्यां शूरः शङ्करवर्धनः ॥ ३३५ ॥
उदयं संहता एव संहता एव च क्षयं ।
प्रयान्तः स्पृहणीयत्वं तन्त्रिणः कस्य नागमन् ॥ ३३६ ॥
माननीयानधृष्यांश्च महावंश्यान् महीपतीन् ।

अक्षीनिव खिलीकृत्य भिन्दयन्तः क्षणे क्षणे ॥ ३३७ ॥
अनयन् क्रीडया क्रीडां मात्यन्तो जीविकाकृते ।
प्रागाहितुण्डिकाः क्रूरा इव ये गर्ह्यवृत्तयः ॥ ३३८ ॥
ते तन्त्रिणः क्षणाद्दग्धा गूढवैरविषाग्निना ।
विमानेना विविग्नेन चक्रवर्ममहाहिना ॥ ३३९ ॥ तिलकं ॥
अथ द्वितीये दिवसे भग्नानामपि तन्त्रिणां ।
वीरसंघट्टनं यावदकरोच्छम्भुवर्धनः ॥ ३४० ॥
तावन्मिलितसामन्तसचिवैकाङ्गलालितः ।
सैन्यैर्नानापथायातैर्नदद्भिर्व्याप्तदिक्पथः ॥ ३४१ ॥
वल्गान् मध्येऽश्ववाराणां नृत्यतेवाग्रवाजिना ।
वल्गांकेनोद्वहल्लम्वं शिरस्त्रं वामपाणिना ॥ ३४२ ॥
सस्वेदतरहस्ताग्रवेष्टनोल्लासनस्पृशः ।
खड्गस्य विम्बितार्कस्य भाभिर्द्योतितकुण्डलः ॥ ३४३ ॥
कवचोत्सेधसंरब्धकण्ठायासेन ताम्यता ।
बद्धभ्रुकुटिबन्धेन वदनेन भयावहः ॥ ३४४ ॥
तर्जयन् कृतझङ्कारांल्लुब्धकांल्लुण्ठितापणान् ।
शिरोऽक्षिसंज्ञया त्रस्तवास्तव्यकृतसान्त्वनः ॥ ३४५ ॥
भेरीरवैः श्रुतिं छिन्दन् पौराशीर्घोषरोधिभिः ।
संग्रामजयशोभाङ्कश्चक्रवर्माविशत् पुरं ॥ ३४६ ॥ कुलकं ॥

तस्मिन् सिंहासनं प्राज्यमाक्रम्यातिजयोर्जिते ।
बद्धा कुतश्चिदानिन्ये भूभटः शम्भुवर्धनं ॥ ३४७ ॥
राज्ञः पुरस्तात् तं शस्त्रपातैर्मीलितेक्षणं ।
भक्तिं प्रदर्शयन् पापश्चण्डाल इव सोऽबधीत् ॥ ३४८ ॥
उत्खातां धर्ममर्यादां भृत्यानां जनकोपमान् ।
हन्तुं नरेन्द्रान् द्रोहेण प्रारब्धः शम्भुवर्धनः ॥ ३४९ ॥
प्राप्य निष्कण्टकं राज्यं चक्रवर्मनृपः क्रमात् ।
अजायत धृतोत्सेको नृशंसविषमक्रियः ॥ ३५० ॥
स्वविक्रमकथास्तोत्ररोमन्थप्रियताहृतः ।
सोऽभवद्विटवन्द्यादिचाटुकारविधेयधीः ॥ ३५१ ॥
आत्मानं दैवतमिव स्तुतिमोहितचेतसः ।
जानतः प्राभवंस्तस्य विवेकविगुणाः क्रियाः ॥ ३५२ ॥
तस्मिन् प्रसङ्गे रंगाख्यः प्रख्यातो डोम्बगायनः ।
वैदेशिकोऽभवद्राज्ञा वितीर्णावसरो बहिः ॥ ३५३ ॥
प्राप्तान् सचिवसामन्तान् विन्यस्यन्तो यथाक्रमं ।
प्रतीहारा नृपस्याग्रमनयन्त विवित्सतां ॥ ३५४ ॥
विबभौ धवलोष्णीषा सभा दीपप्रभोज्ज्वला ।
शेषशय्येव मणिभिः कृतालोका फणोद्भवैः ॥ ३५५ ॥
कृतावरोधधम्मिल्लमालान्दोलनकेलिभिः ।

प्रदोषपवनैश्चक्रे शिशिरैर्घ्राणतर्पणं ॥ ३५६ ॥
जातगीतदिदृक्षाणां गवाक्षावलयो बभुः ।
आसवामोदिभिर्वक्रैरवरोधमृगीदृशां ॥ ३५७ ॥
हारकङ्कणकेयूरपारिहार्यादिशोभिना ।
स्ववृन्देनानुयातोऽथ प्राविशत् डोम्बगायनः ॥ ३५८ ॥
हंसीनागलताचास्य सुते ललितलोचने ।
चक्रतुः कौतुकोद्ग्रीवां सभां चित्रार्पितामिव ॥ ३५९ ॥
तयोर्विलासवलितैश्चलितापाङ्गविभ्रमैः ।
द्वितीयपुष्पप्रकरो व्यकीर्यत सभान्तरे ॥ ३६० ॥
गायनैर्जयजीवेति कृतकोलाहलैरभूत् ।
सदः सशब्दं कुर्वद्भिस्तत्तन्नृपगुणग्रहं ॥ ३६१ ॥
भुक्तोत्तरोचितोदश्वत्पञ्चमस्थानचारिणः ।
वंशैरागविशेषस्य दत्ते स्थाने ततः शनैः ॥ ३६२ ॥
अविक्रियशिरःकम्पभ्रुनेत्रभ्रमशोभितः ।
अभिन्न इव गायन्त्योर्गीतिध्वनिरजृम्भत ॥ ३६३ ॥
अथ ताम्बूलरोमन्थत्यागनिश्चलमूर्तिना ।
जातं राजकुरङ्गेण प्रमोदास्पन्ददृष्टिना ॥ ३६४ ॥
गायन्त्यौ भावमालम्ब्य तस्य स्निग्धमगायतां ।
अधिकोद्रेचिताभिख्यं विलासस्मितविभ्रमैः ॥ ३६५ ॥

रागस्तयोश्च संसक्तश्चित्तयोरिव रेतरं ।
दृग्व्यापारैः स्वसंवेद्यैः संलाप इव पप्रथे ॥ ३६६ ॥
नृपं हारितचित्तं तं विज्ञायैकः प्रियो विटः ।
ततः प्रसङ्गे प्रोवाच प्रीतिवृद्धिकरं वचः ॥ ३६७ ॥
देव गीतमिदं यातं संप्राप्यैते मनोरमे ।
कर्पूरपारीपतितं मैरेयमिव हारितं ॥ ३६८ ॥
गायन्त्योर्मार्गितामेतां रागाद्दत्तचतुष्किकां ।
अनयोः प्रतिमाव्याजाच्चुम्बतीव निशाकरः ॥ ३६९ ॥
करन्यस्तकपोलान्तमुद्गायन्त्याविमे ध्रुवं ।
कटाक्षैः कुरुतो व्योम्नि वैमानिकविमोहनं ॥ ३७० ॥
जानन्त्या स्वाश्रयां चर्चामनयोरेकयावयोः ।
असूयास्मितगर्भोऽयं कटाक्षः पश्य पातितः ॥ ३७१ ॥
गायन्त्येकानतमुखी कर्णव्यालोलकुण्डला ।
विपरीतरतोद्रेककृतारम्भेव शोभते ॥ ३७२ ॥
सफलं तस्य तारुण्यमीदृश्यो निर्जने स्त्रियः ।
औत्सुक्याद्विरहे यस्य गायन्त्येवंविधैः स्वरैः ॥ ३७३ ॥
उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः ।
एकसार्थप्रयातेभ्यः कथमेको विवर्ज्यते ॥ ३७४ ॥
नेत्रस्य रूपं श्रोत्रस्य ध्वनिं संस्पृशतो न चेत् ।

तदङ्गस्यान्यकान्ताङ्गं स्पृशतो दुष्कृतं कुतः ॥ ३७५ ॥
अभिलाषाङ्कुरः सिक्त इव तैर्विटभाषितैः ।
राज्ञः स्वभावलोलस्य शतशाखत्वमाययौ ॥ ३७६ ॥
ये विस्तारितवर्णसंकररुचः सन्दर्श्य गोत्रान्तकृद्-
बद्धावस्थितिचापलं घनमलं पार्श्वे ध्वनन्त्युद्धताः ।
नीयन्ते विपथावपातपरतां लब्धोदयैस्तैः क्षणात्
सिन्धा वारिधरैरमी च रभसाद्भूपालसिन्धा विटैः ॥३७७॥
वस्तुक्षणादनुपपत्त्युपपत्तियुक्तं कृत्वा
जडान् यदि विमोहयितुं समर्थाः ।
न स्युर्विटा अथ कुतर्कपथस्थिताश्च
नित्योद्वसेषु निरयेषु मृगाश्चरेयुः ॥ ३७८ ॥
सन्तोष्य हारकेयूरकुण्डलैर्डोम्बमण्डलं ।
अमार्गत्यागराधेयः शुद्धान्तमगमन्नृपः ॥ ३७९ ॥
कान्तोऽस्याः क्षितिवल्लभोऽयमभिधेत्युर्वीपतेरेकतो
भूतेऽसावतिचण्डताण्डवयुतं डोम्बः स्वनामान्यतः ।
मध्ये यत् किमपीति गीतिरचना काव्यं यदेतद्विदो यल्लक्ष्मीं
क्षपयन्ति तान्धिगबुधान् कीर्त्यर्थिनः पार्थिवान् ॥ ३८० ॥
वेश्यानुरागस्य महेन्द्रचापधाम्नो हरिद्रारसरञ्जनस्य ।
उपाङ्गगीतस्य च हारिणोऽपि सौन्दर्यमस्थैर्यहतप्रकर्षं ॥ ३८१ ॥

दर्शनाभ्याससंवृद्धचक्षूरागः क्षमापतिः ।
विना श्वपाककन्ये ते न पुनः प्राप निर्वृतिं ॥ ३८२ ॥
गायन्त्यौ शयनोपान्ते शनैर्विहितचुम्बनं ।
नृपं रतिसुखाभिज्ञं तं हठात् ते प्रचक्रतुः ॥ ३८३ ॥
समागमेन नव्येन तयोर्वैयात्यशोभिना ।
चक्रे क्षपितसामर्थ्यः स लज्जोद्वहनाक्षमः ॥ ३८४ ॥
रत्यन्तसुलभोद्भेदैर्निस्सृतैः स्वेदविन्दुभिः ।
भाग्योष्मसंक्षयजडं वपुस्तस्य व्यधीयत ॥ ३८५ ॥
रागान्धेन कृता हंसी महादेवी महीभुजा ।
भेजे राजवधूमध्ये वालव्यजनवीजनं ॥ ३८६ ॥
तस्या यैर्भुक्तमुच्छिष्टं ते यथा चक्रवर्मणः ।
नृपान्तराणामन्येषामप्यभूवन् सभासदः ॥ ३८७ ॥
मन्त्रिणामक्षपटलप्रख्यमुख्याधिकारदा ।
प्रवृद्धिहेतुतां प्राप डोम्बसेवनचक्रिका ॥ ३८८ ॥
मौर्ख्यात् सचिवतां केचिच्छ्वपाका न व्यधुः स्वयं ।
केचिच्चकुर्वन्नीतिज्ञा राजकार्याणि मन्त्रिवत् ॥ ३८९ ॥
मन्त्रिणस्तस्करा राज्ञी श्वपाकी श्वपचाः प्रियाः ।
किं न लोकोत्तरमभूद्भूपतेश्चक्रवर्मणः ॥ ३९० ॥
ऋतुस्नातार्तवाङ्कानि श्वपाकी स्वांशुकान्यदात् ।

तदाच्छादनदत्तेच्छा मन्त्रिणः प्राविशन् सभां ॥ ३९१ ॥
कैश्चित् क्षितिभुजा वैरमङ्गीकृत्यापि तत्क्षणं ।
यैर्नाशि श्वपकोच्छिष्टं तेऽभूवन् सोमपैः समाः ॥ ३९२ ॥
मण्डलेऽस्मिन् प्रभावोग्रा न देवा न्यवसन् ध्रुवं ।
तद्वेश्मनि तदा नो चेच्छ्वपाकी प्रविशेत् कथं ॥ ३९३ ॥
तां रणस्वामिनं द्रष्टुं तिलद्वादश्यकेऽगतां ।
सामन्तेभ्यः साभिमानानन्वयुर्डामराः परं ॥ ३९४ ॥
राजकोटुम्बदृप्तानां डोम्बानां निर्गता मुखात् ।
राज्ञामिवाज्ञा दुर्लंघ्या न केनाप्युदलंघ्यत ॥ ३९५ ॥
राज्ञा प्रदत्ते रङ्गाय हेलुग्रामेऽग्रहारवत् ।
लिलेख पट्टोपाध्यायो न यदा दानपट्टकं ॥ ३९६ ॥
तदाक्षपटलं गत्वा रङ्गः कोपात् तमब्रवीत् ।
रङ्गः स हेलुदिन्नेति दासीसुत न लिख्यते ॥ ३९७ ॥
लिलेख सोऽथ सन्त्रासाद्गङ्गभ्रूभङ्गतर्जितः ।
को न राजनि दुर्वृत्ते भवेन्नीतिव्यतिक्रमः ॥ ३९८ ॥
अत्यागमनपापस्य पापः पृच्छन् स निष्कृतिं ।
विट्टैर्हास्यावहान्येव प्रायश्चित्तानि कारितः ॥ ३९९ ॥
क्षेमेनैव क्षेमं शाम्येद्दुष्कृतेनैव दुष्कृतं ।
सोऽनुशिष्टोविट्टैरेवं दधत् पामरसारतां ॥ ४०० ॥

पवित्रास्पर्शितोस्पृश्या स्पर्शपापं जिहीर्षुणा ।
तेनादूष्यत विप्रस्य योषिन्मासोपवासिनः ॥ ४०१ ॥
ततोऽपि पापिनोऽभूवन् केऽपि तस्मिन् क्षणे द्विजाः ।
तस्मादप्यग्रहारान् ये जगृहुर्गृहिभोजिनः ॥ ४०२ ॥
चक्रे चक्रमठं सोऽपि पापः पाशुपताश्रयं ।
तस्मिन् कृतेऽर्द्धनिष्पन्नं तद्वधूर्यदयोजयत् ॥ ४०३ ॥
पूर्वोपकारान् विस्मृत्य डामरान् स निरागसः ।
नृपतिः श्वपचाकामी विश्वस्तांशद्मनाबधीत् ॥ ४०४ ॥
हन्तुं व्याजेन विश्वस्ताः केचिड्डामरतस्कराः ।
तस्थुस्तस्यान्तिके द्वाःच्छिद्रानेहःप्रतीक्षिणः ॥ ४०५ ॥
श्वपाकीशयनावासासन्नावस्करमन्दिरे ।
शौचस्थितं तं निःशस्त्रं ते रात्रौ प्रापुरेकदा ॥ ४०६ ॥
अथ तैः प्राप्तसमयैरकस्मात् तस्य सर्वतः ।
क्षिप्रं न्यपात्यताशेषशातशस्त्रपरम्परा ॥ ४०७ ॥
सुप्तस्तटाह्रदे भ्रष्ट इव निद्रालसेक्षणः ।
प्रबुद्धः शस्त्रपातैः स व्यमुचद्भैरवान् रवान् ॥ ४०८ ॥
निःशस्त्रः शस्त्रमन्विष्यन् क्षरत्क्षतजनिर्झरः ।
अनुद्रुतोऽरिभिर्धावन् शय्यावेश्म विवेश तत् ॥ ४०९ ॥
अप्राप्तहेतिं क्रन्दन्त्या श्वपाक्यालिङ्गिताङ्गकं ।

तत्कुचोत्सङ्गलग्नाङ्गं जघ्नुस्तेऽनुप्रविश्य तं ॥४१०॥
स्वैरेव प्रेरिता दारैस्ते तस्य नृपतेः किल ।
मुमूर्षोर्जानुनी स्वैरं शिलायां समचूर्णयन् ॥४११॥
त्रयोदशाब्दे ज्यैष्ठस्य शुक्लाष्टम्यां ज्ञपाक्षणे ।
श्वपाकभोग्यः स श्वेवावस्करे तस्करैर्हतः ॥४१२॥
उन्मत्तावंतिनामाथ पार्थसूनुर्दुराशयः ।
अभ्यषिच्यत वैधेयैः सचिवैः शर्वटादिभिः ॥४१३॥
श्वपाकीकामुके पापे निहते निशि तस्करैः ।
प्रजानां पाप्मना सोऽभूत् पापात् पापतरो नृपः ॥४१४॥
स्थगिता तत्कथापापस्पर्शभीत्या सरस्वती ।
कथंचित् त्रस्नुरश्वेव सेयं प्रस्थाप्यते मया ॥४१५॥
आसीत् पितृकुलं तस्य भक्ष्यं दुर्नृपरक्षसः ।
और्वाभिधस्य क्रव्याशविशेषस्येव जीवनं ॥४१६॥
तस्यासंष्टकराघातसटाङ्कारकरोटिकाः ।
घ्राणस्कन्दादिवाग्यज्ञाः सभायां मुख्यमन्त्रिणः ॥४१७॥
तेऽमात्याश्चारणत्वेन निर्लज्जास्तमरञ्जयन् ।
कालान्तरेण यैरेव भूमिपालैर्भविष्यते ॥४१८॥
पर्वगुप्तोऽभवत् तस्य सर्वेभ्योऽप्यधिकं प्रियः ।
आस्थाने नर्तनं कुर्वन्नपाकृतकटीपटः ॥४१९॥

आतन्त्रिविप्लवाद्दृष्ट्वा कीटप्रायान् महीपतीन् ।
पर्वगुप्तः सर्वदाभूद्राज्यावाप्तिकृतोद्यमः ॥ ४२० ॥
तदा निगूढराज्येच्छः सख्यं मुख्यैः स मन्त्रिभिः ।
पीतकोशैः प्रविदधे पञ्चभिर्भूभटादिभिः ॥ ४२१ ॥
भूभटः शर्वटश्चोजः कुमुदः सोऽमृताकरः ।
पर्वगुप्तेन संबन्धं चक्रिरे कोशपीथिनः ॥ ४२२ ॥
गवाक्षसरसि प्राप्तश्री ज्जलोऽवागलद्विजः
संग्रामडामरगृहे यो रक्तः ख्यातपौरुषः ॥ ४२३ ॥
पदातिमात्रो भूपेन दृष्टशौर्यः स संयुगे ।
महोदरो महाकायः प्रापितो मुख्यमन्त्रितां ॥ ४२४ ॥
यादृशी तेन ददृशे देवी श्रीः सरसोऽन्तरे ।
तादृग्रक्तजयादेवीत्यभिधानेन निर्ममे ॥ ४२५ ॥
राज्यं निष्कण्टकं कृत्वा धूर्तेनापजिहीर्षुणा ।
प्रेरितः पर्वगुप्तेन भूभृच्चक्रे कुलक्षयं ॥ ४२६ ॥
तेन लुण्ठितसर्वस्वः पार्थस्तस्थौ कलत्रवान् ।
श्रीजयेन्द्रविहारान्तः श्रमणैर्दत्तभोजनः ॥ ४२७ ॥
शिशून् शङ्करवर्मादीन् भ्रातॄन् द्वारान्निरोध्य सः ।
तत्र स्थितानानशनैरुत्क्रान्तासूनकारयत् ॥ ४२८ ॥
उद्यतः पितरं हन्तुं मन्त्रिणोऽनुमतप्रदान् ।

बद्धपटान् व्यधाद्बद्धनिगडानिर्तरान् पुनः ॥ ४२९ ॥
एकदा मन्त्रिसामन्ततन्त्रिकायस्थसैनिकाः ।
पार्थं तदाज्ञामासाद्य निशायां पर्यवेष्टयन् ॥ ४३० ॥
स्नानक्षीणां वरां पत्नीं रुद्धद्वारां निपात्यते ।
आलिंग्यमानां क्रन्दद्भिस्तर्णकैरिव दारकैः ॥ ४३१ ॥
केशानालम्ब्य कर्षन्तः शर्करोत्पाटिताङ्गकं ।
विपन्नं गोकुलाद्दान्तमिव निर्हत्य तं गृहात् ॥ ४३२ ॥
क्षुत्क्षामरुद्धमं क्रन्दन्तं निजघ्नुर्नग्नविग्रहं ।
चण्डाला इव निःशस्त्रं कुमुदाद्या नृपप्रियाः ॥ ४३३ ॥
पितरं निहतं श्रुत्वा राजा संजातकौतुकः ।
प्रातः स्वसचिवैः सार्द्धं गत्वा हृष्टोऽथ दृष्टवान् ॥ ४३४ ॥
अत्राङ्गेऽस्य प्रहारोऽयं मद्दत्त इति वादिनः ।
तस्याग्रे राजपुरुषाः शशंसुर्निजविक्रमं ॥ ४३५ ॥
न्यक्कृत्य स्वीकृतो राज्ञा तदा तज्जननोद्यताः ।
अचूचुदत् पर्वगुप्तो देवगुप्ताभिधं सुतं ॥ ४३६ ॥
पार्थस्य निहतस्याङ्गे सोऽक्षिपत् क्षुरिकां ततः ।
रञ्जितो येन भूपालो जातहासोऽभवच्चिरं ॥ ४३७ ॥
डामरैर्लुण्ठितो देशः प्रणाशे चक्रवर्मणः ।
उत्थाप्य पापकायस्थांस्तेन भूयोऽपि दण्डितः ॥ ४३८ ॥

संप्रेरितः कुसचिवैः शस्त्राभ्यासं चकार सः ।
पाटयन् क्षुरिकाघातैः कोदृवीस्तनकोटरं ॥ ४३९ ॥
गर्भिणीनां च जठरं गर्भान् द्रष्टुमपाटयत् ।
काठिन्यस्य परीक्षार्थमङ्गं कर्मकृतामपि ॥ ४४० ॥
प्रतिग्रहाग्रहाद्द्वारांश्चद्वा बधभयाद्द्विजाः ।
प्रत्यगृह्णन्नग्रहारांस्तस्मादपि नृपाधमात् ॥ ४४१ ॥
क्रूरपापानुरूपेण क्षयरोगेण पार्थिवः ।
तेनानुबाध्यमानोऽभूदपर्यन्तव्यथातुरः ॥ ४४२ ॥
व्यथया तस्य तादृश्या प्रजा एव न केवलं ।
तुतुषुर्निजशुद्धान्तमहिष्योऽपि चतुर्दश ॥ ४४३ ॥
अथान्तःपुरदासीभिर्यः कुतश्चिदुपाहृतः ।
क्षितिपालात् प्रजातोऽयमिति प्रख्यापितो मृषा ॥ ४४४ ॥
तं शिशुं शूरवर्माख्यं विनिवेश्य नृपासने ।
हस्ते निक्षिप्य सामन्तसचिवैकाङ्गतन्त्रिणां ॥ ४४५ ॥
कम्पनाधिपतेर्बद्धद्वेषः कमलबर्धनात् ।
बिभ्यन् मडवराज्यस्थात् डामरोत्पाटनक्षमात् ॥ ४४६ ॥
आसन्ननिरयप्राप्तिः पितृहा पार्थिवाधमः ।
शुचौ पञ्चदशाब्दस्य प्रजापुण्यैः क्षयं ययौ ॥ ४४७ ॥ चतुर्भिः कुलकं ॥
पितृघातिसुतो राजा जयस्वामिविरोचनं ।

आषाढशुक्लसप्तम्यां शिशुर्द्रष्टुं विनिर्ययौ ॥ ४४८ ॥
नवा विरेजे राजश्रीर्बालस्य पृथिवीपतेः ।
कृपाणवेणिललिता छत्रचामरहासिनी ॥ ४४९ ॥
अत्रान्तरे जवायातैश्चारैरावेदितस्तुतः ।
सामन्तैर्नगरोपान्तं प्राप्तः कमलबर्धनः ॥ ४५० ॥
एकाङ्गतन्त्रिसामन्तस्यालङ्कारकसादिभिः ।
नगरं प्रविशन् श्रान्तः समं सैन्यैररुध्यत ॥ ४५१ ॥
विरुद्धडामरानीकान् युद्ध्वा मार्गेषु निर्गतः ।
श्रान्तोऽप्यसौ वैरिसेनामंजयद्विक्रमोर्जितः ॥ ४५२ ॥
सक्षमश्ववाराणां विद्राव्य तुरगैर्मितिः ।
राजधानीमसंरुद्धः प्रविवेश ततः क्षणात् ॥ ४५३ ॥
तं लब्धजयमाकर्ण्य सैन्यैस्त्यक्तां पलायितैः ।
एकाकिनं क्ष्माप्यनयज्जननी शिशुभूपतिं ॥ ४५४ ॥
प्राक्कर्मभिर्मोहितो वा प्रेरितो वा कुमन्त्रिभिः ।
नाभूत् सिंहासनारूढो मूढः कमलवर्द्धनः ॥ ४५५ ॥
तदानीं स्वगृहान् यातो राज्यकामोऽन्यवासरे ।
संघट्टयन् द्विजान् सर्वानचूचुददनीतिवित् ॥ ४५६ ॥
प्रौढं शक्तं च कुरुत क्ष्मापं कञ्चित् स्वदेशजं ।
मामेव कुर्युः सामर्थ्यादिति मूढः स चिन्तयन् ॥ ४५७ ॥

एकाकिनीं रहः क्षीवां लब्ध्वा दुर्लभयोषितं ।
अप्रौढोऽनुपभुज्यान्यदिने क्षत्यार्थयेत यः ॥ ४५८ ॥
विभूतिं रभसावाप्तां यश्च सन्त्यज्य तत्क्षणं ।
नीत्या कामयतेऽन्येद्युः शोच्यस्ताभ्यां परोऽस्ति कः ॥४५९॥युग्मं॥
अथोत्पलकुले छिन्ने स्थूलकम्बलवाहिनः ।
अशृङ्गोक्षनिभा विप्राः समगंसत गोकुले ॥ ४६० ॥
धूमनिर्दग्धकूर्च्चानां राज्ञस्तांस्तांश्चिकीर्षतां ।
राज्यव्यवस्थोपन्यासस्तेषां चिरमवर्द्धत ॥ ४६१ ॥
वैमत्येन मिथस्तेषां नान्यः कोऽप्यभ्यषिच्यत ।
कूर्चाभाषणनिष्ठ्यूतैः स्वकूर्चष्ठीवनैःपरं ॥ ४६२ ॥
राज्यार्थान्वेषिभिर्विप्रैः प्राप्तः स्वस्मृतिक्लृप्तये ।
अवार्य तेष्टकाघातैर्मुग्धः कमलवर्धनः ॥ ४६३ ॥
पञ्चषाणि दिनान्येव यावत् तस्थुर्द्विजातयः ।
काहलाकांस्यतालादिवाद्यकोलाहलाकुलं ॥ ४६४ ॥
उत्पताकध्वजच्छत्रशोभियुग्यार्पितासनं ।
अशेषं पारिषद्यानां तावत् तत्रामिलद्बलं ॥ ४६५ ॥ युग्मं॥
स्वपत्नीं बन्धकीभूतामिवान्यवशवर्त्तिनीं ।
वीक्ष्य राजश्रियं शोचन्नासीत् कमलवर्धनः ॥ ४६६ ॥
पितृघातिवधूश्छन्नपुत्रराज्यार्थिनी ततः ।

प्राङ्क्षिणोद्गाजपुरुषान् पार्श्वं प्रायोपवेशिनां ॥ ४६७ ॥
पिशाचकपुरे ग्रामे वीरदेवाभिधस्य यः ।
कुटुम्बिनः कामदेवनामा सूनुरजायत ॥ ४६८ ॥
स शिक्षिताक्षरो लब्धा मेरुवर्धनमन्दिरे ।
बालाध्यापकतां स्नानशीलादिगुणभूषितः ॥ ४६९ ॥
क्रमाद्गञ्जाधिकार्यासीदथ तस्यात्मजः शनैः ।
लेभे गञ्जाधिकारित्वं राज्ञः शङ्करवर्मणः ॥ ४७० ॥
यः प्रभाकरदेवोऽपि सुगन्धाछन्नकामुकः ।
लक्ष्म्या सरस्वतीद्वेषाद्देशविप्लवतोऽथवः ॥ ४७१ ॥
विद्वान् यशस्करो नाम तत्पुत्रोऽत्यन्तदुर्गतः ।
सख्या फल्गुणकाख्येन समं देशान्तरं गतः ॥ ४७२ ॥
सुस्वप्नदर्शनैः पीठदेव्याशीर्भिश्च कृर्षुलः ।
तस्मिन् प्रसङ्गे सोत्साहः प्रत्यावृत्तो निजां भुवं ॥ ४७३ ॥
पितृघातिबधूद्रूतैर्यातैर्बोधयितुं द्विजान् ।
मध्ये गृहीत्वा वाग्मित्वात् प्रविवेश तदन्तिकं ॥ ४७४ ॥ कुलकं ॥
दृष्ट्वैव तं दैववशादेकमत्यस्पृशो द्विजाः ।
ध्वनिं राजायमेवास्त्वित्युच्चकैरुदचारयन् ॥ ४७५ ॥
अथाभ्यषिच्यत क्षिप्रं विप्रैरेत्य यशस्करः ।
क्ष्माधृतिः प्राप्तसामर्थ्यः सानुमानिव तोयदैः ॥ ४७६ ॥

दग्धं वेणुवनं परस्परमहासंघर्षजेनाग्निना
तन्मूलोद्धृतिरम्भसा क्षणधृतोद्रेकेण संपादिता ।
वात्यावेगविपाटितं विटपिनं प्राप्तं कुतश्चिद्दृढां वृद्धिं
नेतुमहो महाद्रिकुहरे धात्रा न किं सूत्रितं ॥ ४७७ ॥
भृत्यप्रेरणया वंशं पार्थिवः स्वं न चेद्दहेत् ।
तत्पुत्रोत्पाटनं कुर्यान्नचेत् कमलवर्धनः ॥ ४७८ ॥
अनुच्चकुलजातस्य दरिद्रस्याटतः क्षितिं ।
तद्यशस्करदेवस्य राज्यप्राप्तिः कथं भवेत् ॥ ४७९ ॥
पद्भ्यां व्रजन् निरनुगो ददृशे जनेन
यस्तत्क्षणं निखिललोकसमानकीर्तिः ।
साम्राज्यरम्यममुमीक्षितुमास्त
नारीदृङ्गीरजस्तवकितो नरनाथमार्गः ॥ ४८० ॥
नृपतिवसतिं प्रत्यागच्छन् यशस्करभूपतिः
पुरमृगदृशामाशीर्मध्ये वचोऽपि विवक्षितं ।
स्तिमितवलितापाङ्गः शृण्वन् निमीलदहंकृतिः
कृतपरिकरस्तज्ज्ञैर्जज्ञे प्रजापरिपालने ॥ ४८१ ॥
प्रतिमितरविदीपोद्भासिशुभ्रातपत्र-
प्रचयरजतपात्रासूत्रितारात्रिकाश्रीः ।
अथ मुखरितमाशीर्मङ्गलैरङ्गनानाम्

अवनिर्हरिणधामा राजधाम प्रपेदे ॥ ४८३ ॥

इति श्रीकाश्मीरिक महामात्यचम्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां पञ्चमस्तरङ्गः । राजानः आदितः ॥११ ८०॥

अधिकायां समाशीतिं मासेषु च चतुर्ष्वगात् ।

कल्पपालाष्टकं राज्यार्कस्त्रीसचिवा अपि ।

॥ अथ षष्ठस्तरङ्गः ॥

नेदं पर्णसमीरणाशनतपोमाहात्म्यमुद्गोरगौ
पश्यैतावत एव संप्रति कृतौ तन्मात्रवृत्ती वहिः ।
प्रेम्णैवार्द्धमिदं चराचरगुरोः प्रापेयमात्मस्तुतीरिवं ।
देवबधूमुखाच्छ्रुतिसुखाः शृण्वन्त्यपर्णा वतात् ॥ १ ॥

इच्छन्नलंघनीयत्वमथ कक्ष्यां विलंघयन् ।
प्रतीहारान् द्विजा दूरं वार्यन्तामिति सोऽन्वशात् ॥ २ ॥

वेत्रिवित्रास्यमानांस्तु तान् कृताञ्जलिरब्रवीत् ।
राज्यप्रदाश्च पूज्याश्च यूयं नो दैवतैः समाः ॥ ३ ॥

राज्यदानाभिमानेन वर्तिष्यत मदोद्धताः ।
यत्कार्यकालादन्यत्र नागन्तव्यं मदन्तिकं ॥ ४ ॥

तदाकर्ण्याखिलो लोकस्तमदृश्यममन्यत ।
व्यस्मरत् सहसंवाससंभूतमपि लाघवं ॥ ५ ॥

खिलीभूताः पूर्वराजव्यवस्था प्रतिभाबलात् ।
उन्नीतवान् स सुकविः प्राक्कविप्रक्रिया इव ॥ ६ ॥

अचौराभूत् तथा भूमिर्यथा रात्रौ वणिक्पथाः ।
अतिष्ठन् विवृतद्वारा मार्गाश्चाविघ्निताध्वगाः ॥ ७ ॥

प्रत्यवेक्षापरे तस्मिन्नासीत् सर्वापहारिणां ।
कृष्यध्यक्षत्वमुत्सृज्य कृत्यं नान्यन्नियोगिनां ॥ ८ ॥
ग्राम्याः कृषिपराधीना नापश्यन् राजमन्दिरं ।
विप्राः स्वाध्यायसंसक्ता नाकुर्वन् शस्त्रधारणं ॥ ९ ॥
न विप्रगुरवः साम गायन्तो मदिरां पपुः ।
न तापसाः पुत्रदारपशुधान्यान्यढौकयन् ॥ १० ॥
न मूर्खा गुरवो मत्स्या पूपयागविधायिनः ।
चक्रिरे स्वकृतैर्ग्रन्थैस्तर्कागमपरीक्षणं ॥ ११ ॥
नादृश्यन्त च गेहिन्यो गुरुदीक्षोत्थदेवताः ।
कुर्वाणा भक्तिशीलश्रीनिषेधं मूर्धधूननैः ॥ १२ ॥
कार्तान्तिको भिषक् सभ्यो गुरुर्मन्त्री पुरोहितः ।
दूतः स्थेयो लेखको वा न तदाभूदपण्डितः ॥ १३ ॥
प्रायोपवेशाधिकृतैर्बोधितेन महीभृता ।
प्रायोपविष्टो निकटं प्रापितः कश्चिदब्रवीत् ॥ १४ ॥
अहमाढ्योऽभवं पूर्वं वास्तव्योऽत्र महीपते ।
निष्किञ्चनत्वं शनकैरागच्छन्दैवयोगतः ॥ १५ ॥
उत्तमर्णैः पीडितस्य प्रवृद्धर्णस्य तस्य मे ।
निश्चयोऽभूदृणं हित्वा परिभ्रान्तुं दिगन्तरे ॥ १६ ॥
अथ विक्रीय सर्वस्वमृणं शोधयता मया ।

महाधनाय वणिजे विक्रीतं निजमन्दिरं ॥ १७ ॥
भार्यामुद्दिश्य भर्तव्यामेकएव तु वर्जितः ।
सोपानकूपो विक्रीतान्महतो वेश्मनस्ततः ॥ १८ ॥
निदाघे पुष्पताम्बूलीपर्णाढ्यत्रातिशीतले ।
न्यस्यद्भिर्मालिकैर्दत्तात् सा जीवेद्भाटकादिति ॥ १९ ॥
ततोदिगन्तराद्गत्वा विंशत्या वत्सरैरहं ।
लब्धाल्पवित्तः संप्राप्तो जन्मभूमिमिमां पुनः ॥ २० ॥
अन्विष्यता मया साध्वी स्ववधूर्ददृशेऽथ सा ।
विवर्णदेहा जीवन्ती प्रेष्यात्वेनान्यवेश्मसु ॥ २१ ॥
किं दत्तजीविकापि त्वमीदृशीं वृत्तिमाश्रिता ।
मयेति सा मुदुःखेन पृष्टा स्वोदन्तमब्रवीत् ॥ २२ ॥
सोपानकूपं संप्राप्ता त्वयि याते दिगन्तरं ।
लगुडैस्ताडयित्वाहं वणिजा तेन वारिता ॥ २३ ॥
तदन्या कास्ति मे वृत्तिरित्युक्त्वा विरराम सा ।
तदाकर्ण्य निमग्नोऽहमन्तरे शोककोपयोः ॥ २४ ॥
कृतप्रायोपवेशोऽथ स्थैर्यैस्तैस्तैः पदे पदे ।
प्रत्यर्थिनो दत्तजयैः किमप्यस्मि पराजितः ॥ २५ ॥
जडत्वादेष्मि न न्यायं न विक्रीतो मया पुनः ।
सोपानकूप इत्यस्मिन्नर्थे प्राणा इमे पणः ॥ २६ ॥

सोऽहं विपक्षे क्षीणार्थो द्वारि शास्तुस्तव ध्रुवं ।
वृजिनादस्ति चेद्भीतिर्वस्तु निर्णीयतां स्वयं ॥ २७ ॥
राजेति तेन विज्ञप्तो गत्वा धर्मासनं स्वयं ।
संघट्ट्याखिलान् स्थेयानासीत् तत्त्वं विचारयन् ॥ २८ ॥
स्थेयास्तमूचुर्वङ्कशो विचार्यायं पराजितः ।
शाठ्यादगणयन् न्याय्यं दण्ड्यो लिखितदूषकः ॥ २९ ॥
सोपानकूपसहितं विक्रीतं गृहमित्यथ ।
राजा विक्रयपत्रस्थान् स्वयं वर्णानवाचयत् ॥ ३० ॥
ततोऽधिगतमित्येव सभ्येषु निगदत्स्वपि ।
अन्तरात्मा जगादेव नृपतेरर्थिनो जयं ॥ ३१ ॥
मुहूर्तमिव संचिन्त्य राजान्याभिर्भूचिरं ।
कथाभिरतिचित्राभिर्मोहयन् सभ्यमण्डलं ॥ ३२ ॥
कथान्तराले सर्वेभ्यो गृह्णन् रत्नानि वीक्षितुं ।
हसन् प्रत्यर्थिनो हस्तादुपादत्ताङ्गुलीयकं ॥ ३३ ॥
क्षणादिवाखिलैः स्थेयमित्थमेवेति सस्मितं ।
वचो ब्रुवाणः प्रययौ पादक्षालनकैतवात् ॥ ३४ ॥
अभिज्ञानाय तत्रस्थः स वितीर्याङ्गुलीयकं ।
भृत्यमेकं वणिग्वेश्म प्राहिणोद्दत्तवाचिकं ॥ ३५ ॥
स वणिग्गणनाध्यक्षं ययाचे साङ्गुलीयकः ।

यत्राब्दे पत्रमुत्पन्नं गणनापत्रिकां ततः ॥ ३६ ॥
निर्णयेऽथ तया कृत्यमस्ति भाण्डपतेरिति ।
श्रुत्वादाद्गणनाध्यक्षस्तां गृहीताङ्गुलीयकः ॥ ३७ ॥
दीनाराणां दशशती तस्यां भूभृदवाचयत् ।
व्ययमध्येऽधिकरणलेखकाय समर्पितां ॥ ३८ ॥
तस्मै मितधनार्हाय बहुमूल्यार्पणान्नृपः ।
रेफे सकारं वणिजा कारितं निश्चिकाय सः ॥ ३९ ॥
सभायां तत्प्रदर्श्याथ पृष्ट्वा दत्वाभयं च तं ।
आनीय लेखकं सभ्यान् संजातप्रत्ययान् व्यधात् ॥ ४० ॥
सभ्यैरभ्यर्च्यमानेन राज्ञा सार्धं वणिग्गृहं ।
वितीर्णमर्थिनो देशात् प्रत्यर्थी च प्रवासितः ॥ ४१ ॥
कृताह्निकं भोक्तुकामं तं दिनान्ते च भूपतिं ।
अकालावेदनाद्बिभ्यत् क्षत्ता ज्ञातु व्यजिज्ञपत् ॥ ४२ ॥
देवः समाप्तकृत्योऽथ विज्ञप्तौ श्वस्तव क्षणः ।
इत्युक्तो दर्शने प्राणत्यागी विप्रो बहिः स्थितः ॥ ४३ ॥
दत्तप्रवेशादेशोऽथ रुद्धसूदेन भूभुजा ।
द्विजः प्रविष्टः पृष्टोऽथ तीव्रार्तिरिदमब्रवीत् ॥ ४४ ॥
सुवर्णरूपकशतं आन्त्वा देशान्तरेऽर्जितं ।
गृहीत्वा श्रुतसीरास्यः स्वदेशमह्नमागतः ॥ ४५ ॥

त्वयि राजनि निश्चौरैरध्वभिर्विशतः सुखं ।
क्वोऽभवल्लवणोत्से मे दिनान्ते श्राम्यतः स्थितिः ॥ ४३ ॥
दीर्घाध्वलंघनक्लान्तस्तत्राहमकुतोभयः ।
मार्गारामतरोर्मूले त्रियामामत्यवाहयं ॥ ४७ ॥
वेतानं ग्रन्थिबद्धं तद्गुत्थास्तोरपतन्मम ।
अरघट्टे समीपस्थे कक्षयोगादलक्षिते ॥ ४८ ॥
तस्मिन् कूरवरोऽहेऽतिनिर्वसुत्वान्मलिन्ववपुः ।
सोऽहं हारितसर्वस्वः शोचन् रुद्धश्चिरं जनैः ॥ ४९ ॥
एकोऽध्यवसितः कोऽपि साहसी पुरुषोऽब्रवीत् ।
मह्यं दापितवित्ताय किं ददासीति मां ततः ॥ ५० ॥
तमस्म्यवोचं विवशस्तस्यार्थस्यास्मि कः प्रभुः ।
तुभ्यं यद्रोचते मह्यं तत् ततो दीयतां त्वया ॥ ५१ ॥
अवरुह्याधिकूपं सोऽथ कूपकेभ्यो द्रव्यं मम ।
स प्रादात् स्पष्टमेवाष्टानवतिं स्वीचकार तु ॥ ५२ ॥
व्यवहारा वचोनिष्ठा एकाः राज्ञि यशस्करे ।
निन्दन् व्यवस्थां तां लोकैर्न्यक्कृतोऽस्मीति वादिभिः ॥ ५३ ॥
उपचारोक्तिसारल्यच्छलहारितवेतनः ।
सोऽहं जहास्यसून् द्वारे दुर्व्यवस्थापकस्य ते ॥ ५४ ॥
पुंसस्तस्य स राजाथ पृष्टः प्रकृतिनामनी ।

वदन्प्रत्यभिज्ञेव ममास्तीत्यभ्यभाषत ॥ ५५ ॥
प्रातस्तवेप्सितावाप्तिं करिष्यामीति भूभुजा ।
प्रतिज्ञाय कथञ्चित् स स्वपार्श्वे कारितोऽशनं ॥ ५६ ॥
लवणोत्सौकसां दूताङ्कृतानां स विशां ततः ।
स्थितमन्तर्द्विजोऽन्येद्युस्तं राज्ञेऽदर्शयन्नरं ॥ ५७ ॥
पृष्टः स राज्ञा विप्रेण यथैवोक्तं तथैव तत् ।
सर्वमूचे वाक्प्रतिष्ठं व्यवहारमुदीरयन् ॥ ५८ ॥
सत्यवाक्पारतन्त्र्यस्य वस्तुवृत्तस्य चान्तरं ।
अलक्षयन्तः प्रैक्षन्त दोलाकुलधियो धरां ॥ ५९ ॥
धर्मासनस्थो राजाथ रूपकाणामभाषत ।
तमष्टानवतेः पात्रं विप्रमन्यं द्वयस्य तु ॥ ६० ॥
अनुयोक्तुं जगादापि दुःसंचिन्त्या महात्मनः ।
धर्मस्याधर्ममुद्वृत्तं निहन्तुं धावतो गतिः ॥ ६१ ॥
सायं कृताशं प्रविशन्नम्मयं चेन्दुमण्डलं ।
स्वतेजसा संविभजन् प्रदीपैर्ज्योत्स्नयाप्यसौ ॥ ६२ ॥
तदुत्थाय यथा भानुर्निहन्ति ध्वान्तमुद्धतं ।
अनन्यकर्मा धर्मोऽयं तथाधर्मं व्यपोहति ॥ ६३ ॥ युग्मं ॥
दुःसंलक्ष्यस्तु धर्मोऽसावधर्मं बाधतेऽञ्जसा ।
तिष्ठन्नित्यमधिष्ठाय दार्व्यं काष्ठमिवानलः ॥ ६४ ॥

दद्याति यद्भवान् दत्तां तदित्याद्युक्तमुक्तः ।
तुभ्यं रोचत इत्यादि वचोऽस्य निःसृतं तदा ॥ ६५ ॥
रुचितास्य बभूवाष्टानवतिर्लोभिनोऽस्य तां ।
नादादस्मायरुचितं रूपकाणां दयं ददत् ॥ ६६ ॥
इत्यादिसूक्ष्मेक्षिकया धर्माधर्मान्तरं विदन् ।
प्रत्यवेक्षापरः क्ष्माभृद्व्यधात् कृतयुगोदयं ॥ ६७ ॥
इत्थं चनं स विनयन् व्हास्योऽभूत्निजडुर्नयैः ।
परस्यो पदिशन् पथ्यमपथ्याशीव रोगकृत् ॥ ६८ ॥
श्रोत्रियेणेव तेनापि मृदम्भः शौचशालिना ।
डोम्बोच्छिष्टभुजो भृत्याः पार्श्वान्न परिजिह्रिरे ॥ ६९ ॥
यथोत्तरं संश्रितार्थैरन्योन्यं पृष्ठपातिभिः ।
नगराधिकृतैश्चक्रे चतुर्भिः सोऽर्थसंग्रहं ॥ ७० ॥
लेभिरे निधनं तस्मात् सत्यङ्कारात् पदातयः ।
श्रीरणेश्वरपीठाग्रन्यस्तखड्गादपि प्रभोः ॥ ७१ ॥
स ज्येष्ठे भ्रातरि मृते तथाभूद्दुदितश्चिरं ।
तदुपज्ञैर्यथा प्राज्ञैस्तत्रोत्प्रेक्षिरसार्पणं ॥ ७२ ॥
नीतस्य माण्डलेशत्वं वेलावित्तस्य भूभुजा ।
देवीः कामयमानस्य चक्रे राजनिमीलिका ॥ ७३ ॥
रागाच्कुद्दालकान्तानां मूर्द्धानमधिरोपिता ।

लज्जानामाभवद्वेश्या तस्य वैवश्यकारिणी ॥ ७४ ॥
अवकाशः सुवृत्तानां हृदयान्तर्न योषितां ।
इतीव विहितौ धात्रा सुवृत्तौ तद्बहिः कुचौ ॥ ७५ ॥
उत्तमाधमसंसक्तौ ज्ञानन् सदृशवृत्तिताम् ।
नारीणां शुचिवाक्यानामङ्गनावं व्यधाद्विधिः ॥ ७६ ॥
सा लालितापि राज्ञा यज्ञाज्ञा ललितलोचना ।
चण्डालयामिकेनागाद्यामिनीषु समागमं ॥ ७७ ॥ युग्मं ॥
सुभगंकरणं किञ्चिच्चण्डालतरुणोऽभवत् ।
तं यत्प्रभावविवशा भेजे राजबधूरपि ॥ ७८ ॥
सा वा चण्डालकुलजा स वा कार्मणकर्मवित् ।
अन्यथा संगमः किं स्यादसंभाव्यस्तथाविधः ॥ ७९ ॥
सोऽभूत् केन प्रकारेण तया सह समागतः ।
इत्येष लेभे वृत्तान्तः प्रतिभेदं न कुत्रचित् ॥ ८० ॥
केवलं प्रत्यभात् तादृक् पापिनोः प्रेम तत् तयोः ।
दृग्व्यापारेक्षणात् क्षिप्रं ह्लादिनाम्नोऽधिकारिणः ॥ ८१ ॥
तमर्थमथ तथ्येन वीक्ष्य प्रणिधिभिर्नृपः ।
प्रायश्चित्तानुचरणात्क्षामः कृष्णाजिनं दधौ ॥ ८२ ॥
कुपितोऽपि स यत्नेनां न्यवधीद्रागमोहितः ।
तेनैवागात् पुरोभागिवितर्कातङ्कपात्रतां ॥ ८३ ॥

डोम्बोच्छिष्टानुगासङ्गादशुचित्वं यशस्करे ।
संक्रान्तं कुष्ठिसंस्पर्शात् कुष्ठं दुःखमिवाभवत् ॥ ८४ ॥
सामान्येन सता कैश्चित् सदृशैः शुभकर्मभिः ।
जन्मान्तरीयैः साम्राज्यं मया प्रापीति चिन्तयन् ॥ ८५ ॥
साम्राज्यकामोऽपि नृपो भाविष्वपि स जन्मसु ।
युक्त्या प्रादान्निरातङ्कां राजलक्ष्मीं द्विजन्मने ॥ ८६ ॥
भूभुजा दानशौण्डेन पैतृके स्थण्डिले कृतः ।
छात्राणामार्यदेश्यानां तेन विद्यार्थिनां मठः ॥ ८७ ॥
मठाधिपतये तत्र छत्रचामरहासिनीं ।
स नरेन्द्रश्रियं प्रादात् स्वकान्तः पुरवर्जितां ॥ ८८ ॥
वितस्तापुलिने राजा नानोपकरणान्वितान् ।
ब्राह्मणेभ्यः सोऽग्रहारान् पञ्चपञ्चाशतं ददौ ॥ ८९ ॥
अथ जातोदरव्याधिर्मञ्जतो नायमित्यसौ ।
जानन् संग्रामदेवाख्यं परिवर्ज्य निजात्मजं ॥ ९० ॥
समर्थ्य सचिवैकाङ्गसामन्तानभ्यषेचयत् ।
रामदेवात्मजं राज्ये वर्णटं प्रपितृव्यजं ॥ ९१ ॥
शक्ये राज्यादपाकर्तुं शिशावनभिषेचिते ।
निराशाः समपद्यन्त तदा राज्यजिहीर्षवः ॥ ९२ ॥
स पर्वगुप्तकौटिल्यप्रयुक्तोरुदयोन्मुखः ।

विपाककालस्तत्राह्नि भङ्गोन्मुख इवाभवत् ॥ ९३ ॥
राजधानीस्थितस्यापि वर्णटो राज्यदायिनः ।
आरोग्यवार्त्तयाप्यासीन्मुमूर्षोरनिरीक्षकः ॥ ९४ ॥
ततः सानुशयो राजा ताम्यन् प्रैर्यत मन्त्रिभिः ।
राज्यं संग्रामदेवाय दातुमाश्वासकारिभिः ॥ ९५ ॥
राजाज्ञया निशामेकां बद्धोऽष्टस्तम्भमण्डपात् ।
वहिर्दत्तार्गलात् प्रातर्वर्णटो निरवर्त्यत ॥ ९६ ॥
भयात् प्रजागराद्वापि तद्भृत्यानां विवेकिनां ।
आस्थानमण्डपं प्राप पायुक्षालनभूमितां ॥ ९७ ॥
एकाह्नं राजपुरुषस्तदासिं विजयेश्वरे ।
क्रीडाद्देवप्रसादाख्यो राजबीजी समर्पयत् ॥ ९८ ॥
अथाभिषिच्य संग्रामदेवं तीव्रीभवद्व्यथः ।
स राजधान्या निर्गत्य मर्तुं निजमठं ययौ ॥ ९९ ॥
धीः केशश्मश्रुवपने शिरःशाटकवर्जनं ।
काषायग्रहणोद्वेगः शस्त्रत्यागग्रहश्च यः ॥ १०० ॥
राजभृत्यैः प्रतिज्ञातः स तस्मिन् निश्चितक्षये ।
जीवत्येव कृतज्ञत्वव्यञ्जकैः परिवर्जितः ॥ १०१ ॥ युग्मं ॥
द्वे सहस्रे सुवर्णस्य सार्द्धे बद्ध्वा पटाञ्चले ।
यो निर्जगाम राजासौ मुमूर्षुर्निजमन्दिरात् ॥ १०२ ॥

पञ्चभिः पर्वगुप्ताद्यैर्यैतकं तस्य मन्त्रिभिः ।
कृतं सजीवितस्यैव विभज्यान्योन्यमग्रतः ॥ १०३ ॥ युग्मं ॥
विचेष्टमानः शय्यायां व्याधिदग्धान्तरो नृपः ।
तिष्ठन् मठाङ्गनकुटीगर्भे ध्वान्तान्धकारिते ॥ १०४ ॥
अज्ञातसम्बिद्भ्रंशोऽग्रे पश्यन् द्रोहपरान् निजान् ।
प्राणैरह्नानि द्वित्राणि न यदा निरमुच्यत ॥ १०५ ॥
तदा सुहृद्बन्धुभृत्यवेलावित्तैः कृतवरैः ।
जिहीर्षुभिश्च साम्राज्यं विषं दत्वा विपादितः ॥ १०६ ॥ तिलकं ॥
अवरोधवधूमध्यात् सती तं पतिमन्वगात् ।
एका त्रैलोक्यदेव्येव स्वप्रभेव विरोचनं ॥ १०७ ॥
वर्णाश्रमप्रत्यवेक्षा बद्धकक्ष्यः क्षितीश्वरः ।
चक्रभान्वभिधं चक्रमेलके द्विजतापसं ॥ १०८ ॥
कृतात्याचारमालोक्य राजा धर्मवशम्वदः ।
निजग्राह श्वपादेन ललाटतटमङ्कयन् ॥ १०९ ॥
तन्मातुलेन तद्दोषाद्वीरनाथेन योगिना ।
सान्धिविग्रहिकेणाथ स स्वेनैव न्यगृह्यत ॥ ११० ॥
पूर्वाचार्यप्रभावेण स्वमाहात्म्याधिरोपणां ।
प्राख्यापयद्भिर्गुरुभिः श्रद्धयेति यदुच्यते ॥ १११ ॥
ततः ख्यापितेव सप्ताहात् स विपन्न इति श्रुतिः ।

दीर्घव्याधिकृते तस्मिन्नुपपत्तिः कथं भवेत् ॥ ११२ ॥
अथामयान्तरे वाभूत् सा वार्तेत्युच्येत यदि ।
वर्णटाद्यभिशापोऽपि तदायात्वत्र हेतुतां ॥ ११३ ॥
भुक्त्वैश्वर्यं नवसमाश्चतुर्विंशे स हायने ।
मासि भाद्रपदे कृष्णातृतीयस्यां व्यपद्यत ॥ ११४ ॥
पितामहीं शिशोर्गोप्त्रीं विनिवेश्य नृपासने ।
भूभटाद्यैः समं प्राभूत् पर्वगुप्तोऽथ प्रभुभिः ॥ ११५ ॥
क्रमात् समं पितामह्या तान् व्यापाद्येतरान् बली ।
एकः स एवमाक्रान्तः प्रबभूव नृपास्पदे ॥ ११६ ॥
स पार्थिवत्वमन्त्रित्वमिश्रया चेष्टया स्फुटं
राजा राजानकश्चेति मिश्रामेवं धियं व्यधात् ॥ ११७ ॥
सेवमानः स्वयं बालभूपं भोज्यार्पणादिभिः ।
अनूनां प्रत्यभात् पर्वगुप्तो द्रोहवहिष्कृतः ॥ ११८ ॥
यान् द्रोहभीरून् संभाव्य संविभेजे यशस्करः ।
तस्य तत् तनयोच्छेदे त एवासन् प्रयोजकाः ॥ ११९ ॥
करभाङ्गरुहापिङ्गे श्मश्रुणि क्षितिपालवत् ।
स ददौ कुङ्कुमालेपं वर्चः शाद्वलविस्तृते ॥ १२० ॥
विस्यदेकाङ्गसंघातात् प्रकटोत्पाटनाक्षमः ।
प्रमापणाय प्रायुंक्त शिशोः कर्माभिचारिकं ॥ १२१ ॥

न्याय्यं ते सान्वयस्यास्ति राज्यं चैत्रादिवासरे ।
अन्यथा चरतो नाशः क्षिप्रं वंशायुषोर्भवेत् ॥ १२२ ॥
इतीमामपि यामिन्यां श्रुतवान् भूतभारतीं ।
अभिचारस्य बन्ध्यत्वं निर्ध्यायाधिकशङ्कितः ॥ १२३ ॥
एकाङ्गेभ्यो विभिन्नेभ्यो विभ्यदुद्भिन्नसंभ्रमः ।
उदताम्यत् तथा चिन्तालुप्तसंविद्दिवानिशं ॥ १२४ ॥
यथा मकाहिमापातनिःसंचारजने दिने ।
अकस्मात् संभृतबलो राजधानीं निरुद्धवान् ॥ १२५ ॥
विरोधकारिणां बुद्धाभिधेन सह सूनुना ।
निर्द्रोहमार्दवं कृत्वा मन्त्रिणं रामवर्धनं ॥ १२६ ॥
पित्र्येण बेलावित्तेन प्राभृतार्थमुपाहृतां ।
गले पुष्पस्रजं बद्ध्वा पातितः पार्थिवासनात् ॥ १२७ ॥
स तं वक्रांगसंग्रामं हृतमन्यत्र मन्दिरे ।
पातयित्वा वितस्तान्तःकण्ठबद्धशिलं निशि ॥ १२८ ॥
चतुर्विंशस्य वर्षस्य दशम्यां कृष्णफाल्गुणे ।
पापः सखड्गकवचो न्यविक्षत नृपासने ॥ १२९ ॥ चतुर्भिः कुलकं॥
पारेविशोके दिविराज्जातस्याभिनवाभिधात् ।
सूनुः संग्रामगुप्तस्य स तथा पार्थिवोऽभवत् ॥ १३० ॥
केचित् तं प्रत्यवस्थानं ये पुरा प्रतिजज्ञिरे ।

ते सर्व एव तद्गीताः प्रातरेव प्रणेमिरे ॥ १३१ ॥
पार्थिवैकाङ्गसामन्तमन्त्रिकायस्थतन्त्रिणां ।
तद्गीत्या द्रोहवृत्तीनां द्रोहचिह्नमदृश्यत ॥ १३२ ॥
एकाङ्गस्य तदा स्थाने सुप्याभिज्ञनजन्मनेः ।
प्रमादान्मदनादित्यनाम्नो ठक्का व्यदीर्यत ॥ १३३ ॥
हृतांशुकेन भूभर्त्रा कुपितेन खलीकृतः ।
स निकृत्तकचश्मश्रुस्तपस्वी समपद्यत ॥ १३४ ॥
तादृशस्य पुनस्तस्य सस्त्रीपुत्रत्वमीयुषः ।
अद्याप्यभिजने ज्ञातां वसन्ति त्रिपुरेश्वरे ॥ १३५ ॥
कुर्वता पर्वगुप्तेन भूभृता द्रविणार्जनं ।
प्रापिताः पुनरुत्साहं प्रजा रोगानियोगिनः ॥ १३६ ॥
व्यधत्त स्कन्दभवनविहारवसुधान्तिके ।
पर्वगुप्तेश्वरं सोऽपि वृजिनार्जितया श्रिया ॥ १३७ ॥
श्रीयशस्करभूभर्तृशुद्धान्तस्य विशुद्धधीः ।
कौलीनमलुनादेका गौरीव नृपसुन्दरी ॥ १३८ ॥
सुचिराङ्कुरितप्रीतेः पर्वगुप्तस्य याकरोत् ।
समागमार्थिनो युक्त्या वञ्चनामुचितां सती ॥ १३९ ॥
इदं यशस्करस्वामिसुरवेश्मार्द्धनिर्मितं ।
त्यक्त्वा पत्युर्विपन्नस्य कृत्वा निर्वाणपूरणं ॥ १४० ॥

अमोघमस्मि नियमाद्विधास्यामि त्वदीप्सितं ।
सत्युपच्छन्दयन्नेवं सुभ्रुवाभिहितस्तया ॥ १४१ ॥
अथ प्रवृद्धगर्वेण तत्स्वल्पैरेव वासरैः ।
संपूर्णतां सुरगृहं गमितं तेन भूभुजा ॥ १४४ ॥
सा यागज्वलने राजललना पीतसर्पिषि ।
पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुं ॥ १४३ ॥
उपर्यस्या निरस्तासाः पुष्टाः कुसुमवृष्टयः ।
तत्कालिनास्तु न्यपतन्नवर्णमुखरागिरः ॥ १४४ ॥
सुदीर्घसाहसारम्भचिन्तासंरम्भशोषितः ।
पर्वगुप्तो बभूवाथ तृष्णामयपथातिथिः ॥ १४५ ॥
व्याध्याधिप्रशमायासैर्नावाप्यस्थायिनीं स्थितिं ।
मूढाः प्रवृद्धिं नोज्झन्ति द्रोहे श्रीलोभमोहिताः ॥ १४६ ॥
अशंक्य तादृङ्निष्ठोऽपि सोऽकुण्ठैः प्राक्तनैः शुभैः ।
कैश्चित् सुरेश्वरीक्षेत्रे परासुः समपद्यत ॥ १४७ ॥
षड्विंशवत्सरापाढवकुले ऽह्नि त्रयोदशे ।
द्रोहार्जितेन नृपतिः स राज्येन व्ययुज्यत ॥ १४८ ॥
अतीन्द्रियायां परलोकवृत्ताविहैव तीव्राशुभपाकशंसी ।
दृश्येत नाशो यदि नाम नाशु न
कः कुकृत्येन यतेत भीत्यैः ॥ १४९ ॥

क्षेमगुप्ताभिधानोऽभूदथ राजा तदात्मजः ।
आसवासेवनोत्सिक्तवित्ततारुण्यसंज्वरः ॥ १५० ॥
सोऽभूत् स्वभावदुर्वृत्तो नितरां दुर्जनाश्रयात् ।
कृष्णाक्षपादक्षणो घोरमेघान्ध इव भीतिकृत् ॥ १५१ ॥
स्वतुल्यवेशालंकाराः शतं लालितका नृपं ।
तं फल्गुणप्रभृतयो दुराचाराः सिषेविरे ॥ १५२ ॥
द्यूतासवाङ्गनासेवाव्यसनेऽपि स पार्थिवः ।
विटनिर्लुण्ठ्यमानोऽपि नाभूल्लक्ष्मीवहिष्कृतः ॥ १५३ ॥
रागी मधुप्रणयवान् विहिताक्षसक्तिर्यः
साख्यमेति मधुपैर्हृतकोशसारैः ।
पद्मे प्रयाति दिनमात्रमपि प्रसक्तिं ।
श्रीस्तत्र चेत् किमिव तन्न कुतूहलाय ॥ १५४ ॥
विटाः प्रविष्टा हृदयं जिष्णुजा वामनादयः ।
पिशाचस्येव रुचितामशुचिं तस्य चक्रिरे ॥ १५५ ॥
परोपहासकुशलः परनारीरतिप्रियः ।
परायत्ताशयस्तस्थौ पार्थिवोऽनर्थतत्परः ॥ १५६ ॥
ष्ठीवनं श्मश्रुमालासु गालयः श्रोत्रपालिषु ।
तेन क्षिप्ताः प्रतीक्ष्याणां कटीषु च टक्कुराः ॥ १५७ ॥
कटिसंघट्टनान्नार्यो मृगव्यक्षा वनाटनैः ।

विटाश्चाश्लीलरटनैर्वाञ्छाभ्यं तस्य लेभिरे ॥ १५८ ॥
पुंश्चलीजाल्मवैधेयबालकक्रोधनिर्भरा ।
समभूदप्रवेशार्हा राजपर्षन्मनस्विनां ॥ १५९ ॥
जिष्णुपुत्रैः क्षेमगुप्तन्नमाभृच्चल्लपुत्त्रकः ।
चारणत्वगुणाकृष्टः किं न धूर्तैरनर्त्यत ॥ १६० ॥
तस्य कङ्कणवर्षोऽसीत्यभिधानं विधाय ते ।
तोषिताश्चासकृच्चक्रुर्दोष्णोः कङ्कणवर्षितां ॥ १६१ ॥
निर्दोषदोषाविष्कारैः नववस्तुप्रदर्शने ।
अधृष्यटक्काधाने प्रसादः प्रापि तैर्नृपात् ॥ १६२ ॥
संलक्ष्य कुचकक्ष्यान्ताः कृत्वा निजबधूः पुरः ।
रागी राजा गृहान्नीतो द्यूते तैर्निर्धनः कृतः ॥ १६३ ॥
संभोगाभग्नसौभाग्यकृतस्पर्धैः परस्परं ।
संभुज्यैता भवान् वक्तु विशेषमिति चोदितः ॥ १६४ ॥
उपभोगं स्वभार्याणां निर्लज्जैस्तैः स कारितः ।
का कृष्येति च रत्यन्ते पृष्टोऽभीष्टधनप्रदः ॥ १६५ ॥ युग्मं ॥
तस्य लालितकेष्वास्तां मूढा संभोगढौकने ।
मात्राद्याचारित्ररक्षिवाद्विज्ञाकौ कुरिधूर्जटी ॥ १६६ ॥
नीत्वा नर्मकथां गतां निजवपुर्मुञ्चन्ति मानोन्नतिं
सन्दूष्य स्वयमङ्गनाः शुचितया त्यक्तं कुलं कुर्वते ।

सौख्यं घ्नन्ति सुदीर्घमेव न समासन्नया यदर्थं श्रमः
प्रत्याख्याय तदेव वेत्ति न विटैः किं प्रार्थ्यते सेवया ॥ १६७ ॥
यशस्करस्य भूत्वापि सचिवो भट्टफल्गुणः ।
तस्याभूदनुजीव्यं ते धिग्भोगाभ्यासवासनां ॥ १६८ ॥
फल्गुणस्वामिमुख्यानां प्रतिष्ठानां विधायिनः ।
तस्योपदेशो भूभर्त्रा पर्यहास्यसकृद्रहः ॥ १६९ ॥
गृह्णन् विद्वेषितां हन्तुं ठक्कुरादिबलात् ततः ।
वृद्धो रक्कः कम्पनेशो दुर्गोष्ठीमध्यगोऽभवत् ॥ १७० ॥
तीक्ष्णाक्षेपे संप्रविष्टं हन्तुं संग्रामडामरं ।
श्रीजयेन्द्रविहारं स निर्घृणो निरदाहयत् ॥ १७१ ॥
सुगतप्रतिमारीतिं हृत्वा दग्ध्वा ततोऽखिलात् ।
जरद्देवगृहेभ्यश्च संग्राह्य ग्रावसंचयं ॥ १७२ ॥
सुरप्रतिष्ठया दार्थ्यं मूढः स्वयशसो विदन् ।
नगरापणवीथ्यन्तः क्षेमगौरीश्वरं व्यधात् ॥ १७३ ॥
एकः प्रयात्युपरमं द्रविणं तदीयं
कृत्वा परः प्रसभमुद्वहति प्रमोदं ।
नो वेत्ति तत्स्वनिधने परकोषगामि
धिग्वासनामसममोहकृतान्धकारां ॥ १७४ ॥
त्यागिना क्षेमगुप्तेन भुक्तार्थं खशभूभुजे ।

कृत्वा विहारान् निर्द्धानान् ग्रामाः षट्त्रिंशदर्पिताः ॥ १७५ ॥
दुर्गाणां लोहरादीनां शास्ता शतमखोपमः ।
नृपतिः सिंहराजाख्यस्तस्मै स्वां तनयां ददौ ॥ १७६ ॥
स तस्यां शाहिदौहित्र्यां दिद्दायां सक्तमानसः ।
दिद्दाक्षेम इति ख्यातिं ययौ लज्जावहां नृपः ॥ १७७ ॥
मातामहेन भूभर्तृबध्वास्तस्या व्यधीयत ।
श्रीभूमिस्वामिनो दत्तप्रसादो भीमकेशवः ॥ १७८ ॥
चन्द्रलेखाभिधां कन्यां राज्ञि दत्तवताभवत् ।
फल्गुणाद्वारपतिना समं दिद्दा समत्सरा ॥ १७९ ॥
गुरूपदेशः सुमहान् कृतविद्याश्रमस्तथा ।
तस्यनिर्वहणादन्यद्धिद्भुजो हास्यतां ययौ ॥ १८० ॥
अमोघपतनान् प्रासान् योग्यान् संग्रामकर्मसु ।
शृगालमृगयासक्त्या स हि श्लाघ्यानमन्यत ॥ १८१ ॥
तं वृतं वागुरावाहिडोम्बाटविकपेटकैः ।
पर्यटन्तं श्वभिः सार्द्धमपश्यन् सततं जनाः ॥ १८२ ॥
तस्य दामोदरारण्यलल्यानशिमिकादिषु ।
स्थानेषु क्रोष्टुमृगयारसिकस्य वयोऽगमत् ॥ १८३ ॥
अथ कृष्णाचतुर्दश्यां स कुर्वन् मृगयां नृपः ।
ज्वालामपश्यत् क्रोशन्त्याः शृगाल्या निर्गतां मुखात् ॥ १८४ ॥

तदालोकनसंजातसन्त्रासाकम्पितस्ततः ।
लूतामयज्वरेणाभूत् परीतो मृत्युहेतुना ॥ १८५ ॥
मर्तुं ययौ च वाराहक्षेत्रं यत्र विधायकः ।
श्रीकण्ठक्षेममठयोरासीद्धुष्कपुरान्तिके ॥ १८६ ॥
मसूरविदलाकारलूताक्लिन्नकलेवरः ।
पौषे चाब्दे चतुस्त्रिंशे नवमेऽब्दे सिते मृतः ॥ १८७ ॥
क्षेमगुप्तात्मजः क्ष्माभृदभिमन्युरभूत् ततः ।
शिशुर्निस्त्रिंशधर्मिण्या दिद्दादेव्यानुपालितः ॥ १८८ ॥
सन्धिविग्रहशुद्धान्तमुख्यकर्माधिकारिणः ।
निःसाध्वसं राजवधूमबन्ध्यशयनां व्यधुः ॥ १८९ ॥
अभिमन्यौ क्षितिं रक्षत्यकस्मादेव दारुणः ।
तुङ्गेश्वरापणोपान्तादुज्जगाम हुताशनः ॥ १९० ॥
वर्धनस्वामिपार्श्वस्थभिक्षुकीपारकावधिः ।
वेतालसूत्रपातस्थान् स ददाह महागृहान् ॥ १९१ ॥
डोम्बचाण्डालसंस्पृष्टभूपसंपर्कदूषितान् ।
दग्ध्वा महागृहान् वह्निर्भुवः शुद्धिमिवाकरोत् ॥ १९२ ॥
रक्षित्री क्ष्मापतेर्माता स्त्रीस्वभावाद्विमूढधीः ।
सारासारविचारेण लोलकर्णी न पस्पृशे ॥ १९३ ॥
राज्ञः सुतार्पणाद्बद्धवैरा तस्थौ पुरा यतः ।

पतिवत्नीव सा सार्द्धं फल्गुणेनाग्र्यमन्त्रिणा ॥ १९४ ॥
पत्यौ मृते सपत्नीनां दृष्ट्वानुसरणं ततः ।
दम्भेनानुमुमूर्षन्तीमनुमेने स तां द्रुतं ॥ १९५ ॥
निषिषेधानुबन्धात् तु सानुतापां चितान्तिके ।
कृपालुर्मरणादेतामामात्यो नरवाहनः ॥ १९६ ॥
अतो निसर्गपिशुनो रक्कस्तां मन्युदूषितां ।
फल्गुणाद्राज्यहरणाशङ्कां राज्ञीमतिग्रहत् ॥ १९७ ॥
विरागशंसिभिर्लिङ्गैस्तां ज्ञात्वा विषमाशयां ।
समन्युं साखिलामात्यां फल्गुणोऽप्यास्त शङ्कितः ॥ १९८ ॥
स हि सर्वाधिकारस्थः सर्वस्याद्विगतोऽभवत् ।
दीप्यमानोऽधिकं मल्लशौर्योत्साहादिभिर्गुणैः ॥ १९९ ॥
अस्थीनि क्षेमगुप्तस्य गृहीत्वा जाह्नवीं गते ।
पुत्रे कर्दमराजाख्ये प्रबलैरन्वितो बलैः ॥ २०० ॥
तत्प्रत्यागमपर्यन्तं पर्णोत्से स्थातुमुद्यतः ।
अविश्वसन् नृपगृहे फल्गुणो वैरिशङ्कितः ॥ २०१ ॥
निर्गत्य नगराद्यावत् सभाण्डागारसैनिकः ।
काष्ठवाटान्तिकं प्राप्य तावद्रक्कादिचोदितः ॥ २०२ ॥
आकलय्य द्रुतं दिद्दा सन्त्यज्य प्रार्थनादिकं ।
पृष्ठे प्रत्युत याष्टीकांस्तस्य हन्तुं व्यसर्जयत् ॥ २०३ ॥

नवावमानखिन्नः स मिलितानन्तसैनिकः ।
प्रत्यावृत्त्य ततो मानी वाराहं क्षेत्रमाययौ ॥ २०४ ॥
श्रुत्वा समेतसैन्यं तं प्रत्यायातं प्रतापिनं ।
आस्कन्दशङ्किनी दिद्दा सामात्या समकम्पत ॥ २०५ ॥
तस्मिन् क्षेत्रे गतं शान्तं विलप्य स्वामिनं चिरं ।
वराहपादसविधे तेन शस्त्रं समर्पितं ॥ २०६ ॥
द्रोहसंभावनापापं शस्त्रत्यागेन मन्त्रिणा ।
स्वस्य संमार्जितं तेन राजमातुश्च साध्वसं ॥ २०७ ॥
युक्तायुक्तविचारवाह्यमनसः सेवा महद्दैशसं
क्रुद्धेऽस्मिन् प्रतिकारकर्म गहनद्रोहापवादावहं ।
येन न्यूनगुणोदृशेऽपकरणीभावोऽपि तस्मै परं कोपः
कोऽपि विवेकिनः समुचितः शास्त्राय शस्त्राय वा ॥ २०८ ॥
पर्णोत्समेव शनकैः ससैन्ये फल्गुणे गते ।
विगताध्यापका बाला इवामोदन्त मन्त्रिणः ॥ २०९ ॥
रोगक्षेमौ चिन्तयन्ती क्षेमगुप्तवधूरपि ।
अनिशं प्रजज्ञागार स्वयं कण्ठकपाठने ॥ २१० ॥
राज्यप्रार्थी पर्वगुप्तो मन्त्रिणौ कोशपीथिनौ ।
अनिग्रहत् करौ पूर्वं पुत्र्योर्यो क्षेत्रभूभुजौ ॥ २११ ॥
तयोः प्रजातौ तनयौ ख्यातौ महिमपाटलौ ।

अवर्द्धिषातां यौ राजमन्दिरे राजपुत्त्रवत् ॥ २१२ ॥
तौ तत्रावस्थितावेव तत्कालं राज्यलालसौ ।
संमन्त्र्य समगंसातामुद्दामैर्ड्डिम्मकादिभिः ॥ २१३ ॥
बलिनौ तावबलया राज्ञ्यापास्तौ नृपास्पदात् ।
समन्यू स्वगृहादास्तां यावत् कृतगतागतौ ॥ २१४ ॥
एकतः पृष्ठतः प्रादान् मन्त्रिणो निर्गतस्य सा ।
निर्वासनाय याष्टीकांस्तावत् प्रकटवैकृता ॥ २१५ ॥ युग्मं ॥
शक्तिसेनाभिधानस्य श्वशुरस्य निवेशनं ।
प्रविवेश स तज्ज्ञात्वा तं ते तत्रापि दुद्रुवुः ॥ २१६ ॥
शक्तिसेनेन याष्टीकाः सान्त्विता नाचलन् यदा ।
तदा भीतस्य जामातुर्व्यक्तं प्रादात् स संश्रयं ॥ २१७ ॥
तं लब्धसंश्रयं प्राप डिम्मको मुत्कलस्तथा ।
एरमन्तकनामा च परिहासपुराश्रयः ॥ २१८ ॥
श्रीमानुदयगुप्ताख्योऽप्यमृताकरनन्दनः ।
ललितादित्यपुरजा यशोधरमुखा अपि ॥ २१९ ॥
एकैकं तं मिथः सैन्यैर्भुवनक्षोभकारिणः ।
संभूय चक्रुर्द्वैराज्यं मन्त्रिणः पक्षमाश्रिताः ॥ २२० ॥
तस्मिन् महाभये दिड्डापक्षं मन्त्री सबान्धवः ।
एक एव तु तत्याज नाम्नाहो नरवाहनः ॥ २२१ ॥

प्रवर्द्धमानपृतना योद्धुं बद्धाग्रहास्ततः ।
पद्मस्वाम्यन्तिकं प्रापुर्दीप्यमानायुधा द्विषः ॥ २२२ ॥
अथ शूरमठे दिद्दा विसृज्यात्मजनमाकुला ।
आपच्छान्तिक्षमांस्तांस्ताननुपायान् समचिन्तयत् ॥ २२३ ॥
ललितादित्यपुरजान् द्विजान् स्वर्णेन भूरिणा ।
तूर्णं स्वीकृत्य विदधे रिपूणां संघभेदनं ॥ २२४ ॥
एकाङ्गेपेऽखिलैः कोपो विधेय इति वादिभिः ।
महिम्नः पीतकोशैस्तैः सन्धिर्देव्या समं कृतः ॥ २२५ ॥
गोष्पदोल्लंघने यस्याः शक्तिर्नाज्ञायि केनचित् ।
वायुपुत्त्रायितं पंग्व्या तया संघाब्धिलंघने ॥ २२६ ॥
यत्संग्रहो रत्नमहौषधीनां करोति सर्वव्यसनावसानं ।
त्यागेन तद्यस्य भवेन्नमोऽस्तु
चित्रप्रभावाय धनाय तस्मै ॥ २२७ ॥
उत्कोचकाञ्चनादानेऽप्युच्चां ध्यायन्त्युपक्रियां ।
दिद्दा यशोधरादिभ्यः कम्पनादि समार्पयत् ॥ २२८ ॥
अभिचारं महिम्नश्च कृतवत्या मितैर्दिनैः ।
माण्डलेऽखण्डिताज्ञत्वं दिद्दायाः समजृम्भत ॥ २२९ ॥
कदाचित् ठक्कनाख्यस्य शाहेशस्योपरि क्रुधा ।
सह स्ववंशजैर्यात्रां कम्पनाधिपतिर्ददौ ॥ २३० ॥

तद्देशं निम्नगाशैलदुर्गं प्रविशता जवात्।
अखण्डशक्तिना तेन बलादग्राहि ठक्कुनः ॥ २३१ ॥
स कृतप्रणतिस्तस्य करमादाय भूपतेः।
अभिषेकाम्बुभिश्चक्रे शीलताप्यायनं पुनः ॥ २३२ ॥
लब्धप्रवेशैः समये तस्मिन् रक्कादिभिः खलैः।
कम्पनाधिपतौ राज्या विद्वेषोऽग्राहि मूढया ॥ २३३ ॥
उर्वीपतेश्च स्फटिकाश्मनश्च
शीलोज्झितस्त्रीहृदयस्य चान्तः।
असन्निधानात् सततस्थितीनामन्योन्यरागः
कुरुते प्रवेशं ॥ २३४ ॥
स्वचित्तसंवादिवचो वदन्तो धूर्ता
वितन्वन्ति मनः प्रवेशं।
पृथग्जनानां गणिकावधूनां विटाः
प्रभूणामपि गर्भचेटाः ॥ २३५ ॥
द्रोग्धायं ठक्कुनं रक्षन् धनादायीति पैशुनं।
तथ्यमेव तदीयं सा स्वयं वादादमन्यत ॥ २३६ ॥
अथ स्ववसतिं प्राप्ते कम्पनेशे जयोर्जिते।
याष्टीकान् व्यसृजद्दिद्दा स्फुटं निर्वासनोद्यता ॥ २३७ ॥
तदाक्षेपं समाकर्ण्य स्मरन्तः कोशसंविदं।

ते डिम्बकैरमत्ताद्याः पूर्ववद्विक्रियां ययुः ॥ २३८ ॥
नरवाहनमुख्यास्तु राज्ञीपक्षं न तत्यजुः ।
विभेदं पूर्ववत् प्रापदेवं निजबलं पुनः ॥ २३९ ॥
प्रविष्टेषु ततः कोपात् पुरं शुभधरादिषु ।
भट्टारकामठे दिद्दा भूयः पुत्त्रं व्यसर्जयत् ॥ २४० ॥
दत्तार्गले नृपगृहे स्थितां तां देवमोहिताः ।
ते तदैव विना पुत्त्रं विमूढा नोदपाटयन् ॥ २४१ ॥
राज्याः संजघटे लोकः परस्मिन्नेव वासरे ।
यद्बलेन तदा स्थैर्यं सा किञ्चित् समदर्शयत् ॥ २४२ ॥
जयाभट्टारिकापार्श्वाद्यावच्छूरमठान्तिकं ।
व्याप्य स्थितैर्द्विषत्सैन्यैरथ प्रववृते रणः ॥ २४३ ॥
राजधानीं राजसैन्ये प्रविष्टे त्रासविद्रुते ।
सिंहद्वारे घटाबन्धमेकाङ्गाः समदर्शयन् ॥ २४४ ॥
शरीरनिरपेक्षास्ते भीतं संस्तभ्य तद्बलं ।
अधावन् विद्विषां सैन्यं चेलुः केचिच्च शत्रवः ॥ २४५ ॥
तस्मिन्नवसरे राजकुलभट्टः समाययौ ।
तूर्यघोषैर्द्विषां सैन्यं भिन्दन्नानन्दयन्निजं ॥ २४६ ॥
तस्मिन् प्राप्ते द्विषां सैन्यं विननाश विनश्वरं ।
न द्रोहाविनयं जातु सहन्ते शस्त्रदेवताः ॥ २४७ ॥

तोटयत्यायसान् बन्धान् स्फोटयत्युपलानिति ।
यः ख्यातिमावहत् तथ्यां हिम्मको भीमविक्रमः ॥२४८॥
तस्यासिना राजकुलभट्टदेहार्द्धपातिना ।
चर्ममात्रं न तुत्रोट कंकटस्यातिसंकटे ॥ २४९ ॥
विलोक्य तदसंभाव्यं सैन्ये दैन्यं समाश्रिते ।
अघानि हिम्मको यैयैरवाष्टम्भि यशोधरः ॥ २५० ॥
तथाप्यासीत् स्फुरन् संख्ये य एरमत्तकः क्षणं ।
स भग्नासिश्च्युतो वाहाज्जीवग्राहमगृह्यत ॥ २५१ ॥
नाम्ना तैरेष्यता धातुं यः श्रीमान् राजभान्धवः ।
जगामो दयगुप्तः स क्वापि त्यक्त्वा महाहवं ॥ २५२ ॥
इत्थं लब्धजया राज्ञी तत् क्षणान्यग्रहीद्रुषा ।
यशोधरं शुभधरं मुकुलं च सबान्धवं ॥ २५३ ॥
काश्मीरिकाणां यः श्राद्धशुल्कोहर्ता गयान्तरे ।
सोऽप्येरमत्तकः शूरः परिहासपुराश्रयः ॥ २५४ ॥
बद्ध्वा महाशिलां कण्ठे वितस्ताम्भसि पातितः ।
स्वदुर्नयफलं देव्याः प्रकोपेनानुभावितः ॥ २५५ ॥
ये सप्तसप्तताद्वर्षादागोपालनृपात् पुरा ।
अभिमन्युं यावदासन् षोडशानां महीभुजां ॥ २५६ ॥
वर्षषष्टिं प्रतापायुः श्रीहराः श्रीवृत्तयः ।

ते क्षिप्रं मन्त्रिणः सर्वे सान्ववायाः सहानुगाः ॥ २५७ ॥
भीमभ्रूभङ्गमात्रेण दिद्दादेव्या सकोपया ।
आसन् निःशेषतां नीता दुर्गयेव महासुराः ॥ २५८ ॥ तिलकं ॥
अभवन् विहिता राज्ञ्या तानुत्पाद्य मदोद्धतान् ।
रक्कादयः कम्पनादिकर्मस्थानाधिकारिणः ॥ २५९ ॥
इत्थं मन्त्रिप्रकाण्डः स शण्डामाखण्डलोपमां ।
अखण्डमण्डलां चक्रे निर्द्रोहो नरवाहनः ॥ २६० ॥
राज्ञी कृतज्ञभावेन सापि मन्त्रिसभान्तरे ।
तमाजुहाव निर्द्रोहं स्वयं राजानकाख्यया ॥ २६१ ॥
सुप्ते सुस्वाप निष्पन्नभोजनेऽस्मिन्नभुङ्क्त सा ।
हृष्टे जहर्ष निर्विण्णे निर्विवेदानुकूल्यतः ॥ २६२ ॥
आरोग्यान्वेषणं शिक्षाप्रार्थनां गृहवर्त्तिनः ।
सात्मवस्तुविसर्गं च नाकृत्वा तस्य पिप्रिये ॥ २६३ ॥
अभूतां पुण्यवाहस्य कुथ्यनाम्नः सुतौ पुरा ।
यौ सिन्धुभुय्यौ तज्ज्यायान् सिंधुर्लालितकः किल ॥ २६४ ॥
पर्वगुप्तगृहे भूत्वा गञ्जाध्यक्षे स्थिते क्रमात् ।
लब्धा गञ्जाधिकारित्वं तस्या राज्ञ्याः शनैरभूत् ॥ २६५ ॥
वृथा तयैव गञ्जेशो नवायामविधायकः ।
कर्मस्थानस्य निर्माता सिन्धुगञ्जाभिधस्य यः ॥ २६६ ॥

प्रायशो हृतराज्यस्ते वर्तते नरवाहनः ।
इति नेपथियं राज्ञीं सोऽभ्यधत्त दुराशयः ॥ २६७ ॥
सा तथेत्यब्रवीद्यावत् तावत् प्रेम्णा स जातुचित् ।
मन्त्री तां प्रार्थयामास भोक्तुं निजगृहागमं ॥ २६८ ॥
स सानुगां तत्र यातां ध्रुवं त्वामेव बत्स्यति ।
इत्युक्ता सिन्धुनापृच्छत् तत्कर्त्तव्यं भयाकुला ॥ २६९ ॥
अनुक्त्वैव प्रचलिता राजधानीमलक्षिता ।
स्त्रीधर्मिण्यस्मि जातेति पश्चाद्वार्त्तां व्यसर्जयत् ॥ २७० ॥
संप्रवृत्तोपचारायां गतायां तत्पथात् तथा ।
राज्ञ्यां नाशममात्यस्य प्रीतिं संविद्य सा ययौ ॥ २७१ ॥
तयोस्ततः प्रभृत्येव निष्कृष्टस्नेहयोः कृतं ।
चाक्रिकैरतिरूक्षत्वं तिलपिण्याकयोरिव ॥ २७२ ॥
कुलिशं सर्वलोकानामम्भसां शैलसेतवः ।
अभेद्याः प्रतिभाव्यन्ते न किञ्चिदसतां पुनः ॥ २७३ ॥
ये बाल्यादपि संभूताः प्राज्ञाः सुरगुरोरपि ।
तेषां न विद्मः किं तावन्निर्माणपरमाणवः ॥ २७४ ॥
विश्वासोज्झितधीः शिशून् कलयते काकोऽन्यदीयान् निजान्
हंसः क्षीरपयोविभागकुशलस्त्रस्यत्यसाराद्घनात्
लोकावेक्षणतीक्ष्णधीः खलगिरं जानाति सत्यां नृपो

धिग्वैदग्ध्यविमुग्धताव्यतिकरस्पृष्टं विधानं विधेः ॥ २७५ ॥
मूढाचरणाद्धीना सा श्रुतिवाह्यतया तया ।
वैधेयविप्रप्रकृतिरिव प्रायाद्विगर्ह्यतां ॥ २७६ ॥
उद्वेजितस्तया शश्वत् तथा स नरवाहनः ।
यथा विमाननोत्तप्तः स्वयं तत्याज जीवितं ॥ २७७ ॥
प्रकुप्यत्यप्रतीकार्ये स्वतेजस्तप्तचेतसां ।
शरणं मरणं त्यक्त्वा किमिवान्यद्यशोऽर्थिनां ॥ २७८ ॥
शशिहीनेव रजनी सत्यत्यक्तेव भारती ।
विरराज न राजश्रीर्नरवाहनवर्जिता ॥ २७९ ॥
सा क्रौर्याभ्यासविषमा हन्तुं विततविक्रमान् ।
संग्रामडामरसुतान् समीपस्थानचिन्तयत् ॥ २८० ॥
निजमुत्तरघोषं ते तद्भयेन विनिर्गताः ।
कथ्यकद्वारपत्यादीन् कृतारक्षीन् व्यपादयन् ॥ २८१ ॥
उत्पिञ्जभीतया राज्ञ्या त्यक्त्वा परिभवत्रपां ।
ते यत्नात् समघट्यन्त मानः स्वार्थार्थिनां कुतः ॥ २८२ ॥
स्थानेश्वरादिभिर्मुख्यैर्डामरैरितरैः समं ।
ते भीताः पुरतस्तस्याः पुनरेत्य जजृम्भिरे ॥ २८३ ॥
अथ तद्भीतया राज्ञ्या रक्के प्रमयमागते ।
आनीतः फल्गुणो भूयो वीरार्थिन्या निजान्तिकं ॥ २८४ ॥

राजकार्याणि कुर्वाणः स भूयः शस्त्रमग्रहीत् ।
न्यस्तशस्त्रोऽपि यत्सत्यं दुस्त्यजा भोगवासना ॥ २८५ ॥
मङ्खिमा राजपुर्यादिजयिनस्तस्य पश्चिमः ।
अद्भुतो वृद्धबन्ध्यकया अवरुद्ध इवाभवत् ॥ २८६ ॥
अभूदुदयराजस्य देवीभ्रातुरतिप्रियः ।
यः सहायोऽत्तपटले जयगुप्ताभिधः कुधीः ॥ २८७ ॥
अन्येऽधिकारिणस्तेन सहिताः क्रूरवृत्तयः ।
कश्मीरेषु व्यधुर्लुण्ठं दुष्कृतैस्तदुपार्जितैः ॥ २८८ ॥
दौःशील्यभाजो मातुश्च पाप्मभिर्विधुरीकृतः ।
अभिमन्युः क्षणे तस्मिन् क्षयरोगेण पस्पृशे ॥ २८९ ॥
पण्डितः पुण्डरीकाक्षो विद्वत्पुत्रैरुपस्कृतः ।
कृतश्रुतः स वैदुष्यतारुण्याभ्यां विद्युते ॥ २९० ॥
तथा विशुद्धप्रकृतेस्तस्य दुष्कृतसंगमः ।
शोषाधायी शिरीषस्य रविताप इवाभवत् ॥ २९१ ॥
वर्धमानः प्रज्ञाचन्द्रस्तृतीयस्यां स कार्तिके ।
शुक्लेऽष्टाचत्वारिंशाब्दे ग्रस्तो नियतिराक्षसा ॥ २९२ ॥
तत्पुत्रो नन्दिगुप्तस्तु बालश्चक्रे निजासने ।
वृद्धस्तनयशोकस्तु दिद्दाया हृदये पदं ॥ २९३ ॥
सा शोकपिहितक्रौर्या तस्थौ प्रशमशीतला ।

रविरत्नशलाकेव ध्वान्तच्छन्नोष्मवैकृता ॥ २९४ ॥
ततः प्रभृत्यद्भुताभिस्तस्या धर्मप्रवृत्तिभिः ।
कुकर्मभिरुपोढापि लक्ष्मीः प्राप्ता पवित्रतां ॥ २९५ ॥
नगराधिपतिर्भुय्यः सिन्धुभ्राता शुभाशयः ।
तदीयधर्मचर्चायां बभूव परिपोषकः ॥ २९६ ॥
सा तेनोत्पादितानर्घज्ञनरागा गतैनसा ।
ततः प्रभृत्यभूद्देवी सर्वलोकस्य सम्मता ॥ २९७ ॥
राज्ञः ससचिवः सत्यं दुःप्रापो लुप्तचण्डिमा ।
कुर्याच्चः सुखसेव्यत्वं हेमन्त इव भास्वतः ॥ २९८ ॥
सा निर्मात्री विपन्नस्य सूनोः सुकृतवृद्धये ।
अभिमन्युस्वामिनोऽभूदभिमन्युपुरस्य च ॥ २९९ ॥
अथ दिद्दापुरोपेतो दिद्दास्वामी तया कृतः ।
मठश्च मध्यदेशीयलाटशौडोऽत्र संश्रयः ॥ ३०० ॥
भर्तुः कङ्कणवर्षस्य पुण्योत्कर्षाभिवृद्धये ।
चकार कङ्कणपुरं रमणी स्वर्णवर्षिणी ॥ ३०१ ॥
श्वेतशैलमयं चान्यं सा दिद्दा स्वामिनं व्यधात् ।
धवलं चरणोद्भूतगङ्गाम्भःप्लवनैरिव ॥ ३०२ ॥
चक्रे काश्मीरिकाणां च दैशिकानां समाश्रयः ।
तयात्युच्चचतुःशालो विहारश्चारुसंपदा ॥ ३०३ ॥

श्रीसिंहस्वामिनं नाम्ना सिंहराजस्य सा पितुः ।
मठं च विदधे स्थित्यै देशिकानां द्विजन्मनां ॥ ३०४ ॥
मठप्रतिष्ठावैकुण्ठनिर्माणाद्यैः स्वकर्मभिः ।
तयातिपवनश्चक्रे वितस्तासिन्धुसंगमः ॥ ३०५ ॥
तेषु तेषु प्रदेशेषु किमुक्तैर्भूरिभिः शुभैः ।
सा प्रतिष्ठां व्यरचयच्चतुःषष्टिमिति श्रुतिः ॥ ३०६ ॥
जीर्णोद्धाराः कृता देव्या प्लुष्टप्राकारमण्डलाः ।
प्रायः सुरगृहाः सर्वे शिलावप्रावृताः कृताः ॥ ३०७ ॥
क्रीडाचंक्रमणे राज्ञ्यापंग्व्याविग्रहवाहिनी ।
वल्गाभिधा वैवधिकी वल्गामठमकारयत् ॥ ३०८ ॥
तीर्थासेवनमौनभागपि तिमिः सक्तः स्वकुल्याशने
वाताशान् ग्रसते शिखी घनपयोमात्राशनोऽप्यन्वहं ।
विश्वस्तान् जलचारिणः प्रकटितध्यानोऽपि भुंक्ते वकः
सत्कर्माचरणेऽपि दोषविकृता न प्रत्ययः पापिनां ॥ ३०९ ॥
वर्षिणी वर्षमात्रेण शान्तशोका बभूव सा ।
भोगोत्सुकार्भके तस्मिन् नप्तरि व्यभिचारकृत् ॥ ३१० ॥
वर्ष एकान्नपञ्चाशे नीतः पञ्चे सिते क्षयं ।
स मार्गशीर्षद्वादश्याममार्गव्यग्रया तया ॥ ३११ ॥
पौत्रस्त्रिभुवनो नाम मार्गशीर्षे सितेऽहनि ।

पञ्चमेऽप्येकपञ्चाशे वर्षे तद्वत्तया कृतः ॥ ३१२ ॥
अथ मृत्युपथे राज्यनाम्नि स्वैरं निवेशितः ।
क्रूरया चरमः पौत्रो भीमगुप्ताभिधस्तथा ॥ ३१३ ॥
तस्मिन्नवसरे वृद्धः फल्गुणोऽपि व्यपद्यत ।
निगूढक्रौर्यदौःशील्या दिद्दा यद्भीरवादभूत् ॥ ३१४ ॥
बभूव साथ सुस्पष्टदुष्टचेष्टाशतोत्कटा ।
भ्रष्टवज्रपटा मत्तदन्तिमूर्तिरिवोत्कटा ॥ ३१५ ॥
महाभिजनजातानामपि हा धिङ्निसर्गतः ।
सरितामिव नारीणां वृत्तिर्निम्नानुसारिणी ॥ ३१६ ॥
स्रोतोऽधिराज्यमधिगम्य विराजमानात्
सिन्धोः प्रसूय कमलाल्पपयोनिकेते ।
जातं सरस्यविरतं जलजे प्रसक्ता नार्यो
महाभिजनजा अपि नीचभोग्याः ॥ ३१७ ॥
खशस्य वर्द्धिवासाख्यपर्णोत्सग्रामजन्मनः ।
वाणस्य सूनुस्तुङ्गाख्योऽविशन्महिषपालकः ॥ ३१८ ॥
प्रविष्टो जातु काश्मीराँल्लेखहारककर्मणा ।
सुगन्धिसीहप्रकटनागाढ्यिकषन्मुखैः ॥ ३१९ ॥
पञ्चभिर्भ्रातृभिः सार्द्धं सन्धिविग्रहकान्तिके ।
देव्यादृग्गोचरं यातो हृदयावर्जकोऽभवत् ॥ ३२० ॥ तिलकं॥

रहः प्रवेशितो दूत्या स भाव्यर्थबलाद्युवा ।
संभुक्तभूरिजाराया अपि तस्याः प्रियोऽभवत् ॥ ३२१ ॥
तुङ्गानुरागिणी राज्ञी पापा लज्जोज्झिता ततः ।
रसदानेन वैमुख्यभाजं भुय्यमघातयत् ॥ ३२२ ॥
धिङ्निर्विचारान् कुपतीन् येषां विषमचेतसां ।
फलशून्या स्तुतिस्तोषे दोषे प्राणधनक्षयः ॥ ३२३ ॥
रकुञ्जो देवकलशो वेलावित्तः कृतस्तया ।
भुय्याधिकारे कौटिल्यमाचरन् निस्त्रपो विटः ॥ ३२४ ॥
येऽपि कर्दमराजाद्या वीराह्वारादिनायकाः ।
तेऽपि कौटिल्यमभजन्नन्येषां गणनैव का ॥ ३२५ ॥
चतुः पञ्चानि वर्षाणि तिष्ठन् नृपगृहे शिशुः ।
भीमगुप्तोऽभवद्यावत् किञ्चित् प्रौढीभवन्मतिः ॥ ३२६ ॥
राज्यव्यवस्था यावच्च पितामह्याश्च वृत्तयः ।
दुस्थिताः प्रत्यभासन्त संस्थाप्यास्तस्य चेतसि ॥ ३२७ ॥
अङ्गशीलविहीनाया निर्घृणाया निसर्गतः ।
तावन्नेयधियस्तस्याः सचिन्त्यः समपद्यत ॥ ३२८ ॥
अभिमन्युबधूस्तं हि चक्रे गूढप्रवेशितं ।
महाभिजनजं पुत्त्रं तस्मात् सोऽभूत् तथाविधः ॥ ३२९ ॥
सा देवकलशेनाथ दत्तमन्त्रा विशङ्किता ।

अपोज्झिता स्पष्टमेव भीमगुप्तमबन्धयत् ॥ ३३० ॥
निगूढे नन्दिगुप्तादिद्रोहे लोकस्य योऽभवत् ।
सन्देहः स तया तेन व्यक्तकृत्येन वारितः ॥ ३३१ ॥
ताभिस्ताभिर्यातनाभिर्भीमगुप्तं निपात्य सा ।
षट्पञ्चाशेऽभवद्वर्षे स्वयं क्रान्तनृपासना ॥ ३३२ ॥
प्रवृद्धरागया राज्ञ्यां दत्तोद्रेको दिने दिने ।
सर्वाधिकारी तुङ्गोऽथ बभूवाधरिताखिलः ॥ ३३३ ॥
सभ्रातृकेन तुङ्गेन मीलिताः पूर्वमन्त्रिणः ।
राज्यविप्लवमाधातुमयतन्त विरागिणः ॥ ३३४ ॥
तेऽथ संमन्त्र्य कश्मीरानानिन्युः क्रूरपौरुषं ।
उग्रं विग्रहराजाख्यं दिद्दाभ्रातुः सुतं नृपं ॥ ३३५ ॥
मुख्याग्रहारान् स प्राप्तो विधातुं राज्यविप्लवं ।
धीमान् प्रायोपवेशाय द्रुतं प्रावेशयद्द्विजान् ॥ ३३६ ॥
विहितक्रोधेषु विप्रेषु लोकः सर्वोऽपि विप्लुतः ।
अन्विष्यन्वहं तुङ्गं तत्र तत्र जिघांसया ॥ ३३७ ॥
कस्मिंश्चित् पिहितद्वारे तुङ्गं प्रच्छाद्य वेश्मनि ।
दिनानि कतिचिद्दिद्दा तस्थावास्कन्दशङ्किनी ॥ ३३८ ॥
तया स्वर्णप्रदानेन सुमनोमत्तकादयः ।
ब्राह्मणाः समगृह्यन्त ततः प्रायो न्यवर्तत ॥ ३३९ ॥

एवं तस्मिन् महाक्षेपे तया दानेन वारिते ।
ययौ विग्रहराजः स भग्नशक्तिर्यथागतं ॥ ३४० ॥
अथ दार्व्वं समासाद्य तुङ्गाद्याः प्रभविष्णवः ।
शनैः कर्दमराजादीन् जघ्नुर्विहितविप्लवान् ॥ ३४१ ॥
सुलक्कनो रक्कसूनुस्तथान्ये मुख्यमन्त्रिणः ।
रुष्टैर्निर्वासितादेशात् तुष्टैस्तैः संप्रवेशिताः ॥ ३४२ ॥
प्रवर्द्धमानवैरेण गूढदूतैर्विसर्जितैः ।
प्रायं विग्रहराजेन ब्राह्मणाः कारिताः पुनः ॥ ३४३ ॥
उत्कोचादित्सया विप्रा भूयः प्रायविधायिनः ।
लब्धस्थैर्येण तुङ्गेन सन्निपत्यापकर्षिताः ॥ ३४४ ॥
तेषां मध्ये वसन् गूढमादित्याख्यः पलायितः ।
हतो विग्रहराजस्य प्रियः कटकवारितः ॥ ३४५ ॥
शस्त्रहतः प्रतीहारो वत्सराजाभिधः पुनः ।
न्यङ्कातकादिभिर्धावन् जीवग्राहमगृह्यत ॥ ३४६ ॥
ते स्वर्णग्राहिणो विप्राः सुमनोमन्त्रकादयः ।
सर्वेऽपि बद्धास्तुङ्गेन कारागारं प्रवेशिताः ॥ ३४७ ॥
अथ फल्गुणनाशेन हृते राजपुरीपतौ ।
तं प्रत्यारब्धिरभवत् क्रुध्यतां सर्वमन्त्रिणां ॥ ३४८ ॥
निपत्य संकटे वीरः पृथ्वीपालाभिधस्ततः ।

चक्रे राजपुरीराजकाश्मीरिकबलक्षयं ॥ ३४९ ॥
शिपाटको हंसराजो विपन्नौ तत्र मन्त्रिणौ ।
चन्द्राग्नैर्दुर्गतिं दृष्ट्वा मरणं यत्र भेषजं ॥ ३५० ॥
अथान्येन पथा कस्मात् तुङ्गः सार्धं सहोदरैः ।
कृत्स्नां राजपुरीं वीरः प्रविश्य सहसादहत् ॥ ३५१ ॥
ननाश तेनोपायेन पृथ्वीपालः सपार्थिवः ।
शेषाणां मन्त्रिणां सैन्यं प्राप मुक्तिं च संकटात् ॥ ३५२ ॥
अबलः सन् स भूपालस्तुङ्गाय प्रददौ करं ।
एवं कृतं ततस्तेन नष्टस्यार्थस्य योजनं ॥ ३५३ ॥
प्रविशन् नगरं तुङ्गस्ततः स्वीकृतकम्पनः ।
चकार डामरग्रामसंहारं सिंहविक्रमः ॥ ३५४ ॥
दिद्दाप्युदयराजस्य भ्रातुः पुत्रं परीक्षितं ।
चक्रे संग्रामराजाख्यं युवराजमशङ्किता ॥ ३५५ ॥
सा हि सर्वान् शिशुप्रायान् पुरो भ्रातृसुतान् स्थितान् ।
परीक्षितुं मुमोचाग्रे पाले वत फलावलिं ॥ ३५६ ॥
शक्तः कियन्ति कः प्राप्तुं फलान्यत्रेतिवादिनी ।
साभवद्राजपुत्राणां तेषां कलहकारिणी ॥ ३५७ ॥
गृहीताल्पफलांश्चान्यप्रहारांस्तान् ददर्श च ।
संग्रामराजं त्वस्वल्पफलभाजमविक्षतं ॥ ३५८ ॥

अनन्तफलसंप्राप्तावज्ञतत्वे च कारणं ।
सविस्मयं तया पृष्टस्स तामेवं तदाब्रवीत् ॥ ३५९ ॥
अन्योन्यकलहव्यग्रानेतान् कृत्वा पृथग्वसन् ।
समवायं फलान्यस्मिन् न चाभूवं परिक्षतः ॥ ३६० ॥
व्यसने संप्रविश्यान्यान् स्थितानामप्रमादिनां ।
न काः क्लेशविहीनानां घटन्ते स्वार्थसिद्धयः ॥ ३६१ ॥
श्रुत्वेति तस्य सा वाचमप्रमत्तवदुक्तिकां ।
भीरुर्नारीस्वभावेन राज्येऽमन्यत योग्यतां ॥ ३६२ ॥
शूरस्य लभ्यं शौर्येण भीरोर्भीरुतया यथा ।
कार्यं हि प्रतिभात्यन्तर्न भवेच्च तदन्यथा ॥ ३६३ ॥
काष्ठं वह्न्युज्झितमपि भवेच्छीतशान्त्यै कपीनां
लोम्नां शुद्धौ सलिलमनलश्चाग्निशौचैणकानां ।
जन्तोर्भावा विदधति यथा भाविनः कार्यसिद्धिं तत्त्वं तेषां
क्वचन सहजं वस्तुनो नास्ति किञ्चित् ॥ ३६४ ॥
तस्यामेकान्नशीत्यब्दशुक्लभाद्राष्टमीदिने ।
देव्यां दिवं प्रयातायां युवराजोऽभवन् नृपः ॥ ३६५ ॥
स्त्रीसंबन्धेन भूपालवंश्यानां भुवनाद्भुतः ।
तृतीयः परिवर्तोऽयं वर्ततेऽमुत्र मण्डले ॥ ३६६ ॥
निर्नष्टकण्टककुले वसुसंपदाढ्ये

श्रीसातवाहकुलमाप महीतलेऽस्मिन् ।
दावाग्निदग्धकुतरौ जलदाम्बुसिक्ते
चूतप्ररोह इव केलिवने प्रवृद्धिं ॥ ३६७ ॥
अथ समुद्गतयान्तर्गूढधैर्यानुभावः
सुखमवनिमशेषां द्रोणि संग्रामराजः ।
विसकुलनिभशोभानिह्नुतप्राणसारः
फणाकुले उरगाणामीशितेव न्यधत्त ॥ ३६८ ॥
इति श्रीकाश्मीरिकमहामात्यचम्पकप्रभुसूनोः
कल्हणस्य कृतौ राजतरङ्गिण्यां षष्ठस्तरङ्गः ॥
अत्र वर्षचतुर्ष्वष्टमासेऽप्यथ दिनेषु च ।
अष्टस्वभूवन् भूपाला दश भूभोगभोगिनः ॥

CORRECTIONS

A FAIRE

DANS L'ÉDITION DE CALCUTTA.

LIVRE PREMIER.

Sloka	Vers	Au lieu de :	lisez :
24	1	तंदमन्दंसस्पन्द्	तंदमन्दसस्यन्
28	2	नांगादेशेन	नागाधीशेन
29	1	नागमुखी	नागमुखा
39	1	मुव्यबलैः	पुण्यबलैः
41	2	ऽप्प	ऽप्य
50	2	नास्त्येवं	नास्त्यंव
55	1	शतेनब्दैर्य्यासु	शतेनब्दैर्यास्तु
59	2	समं ह्रोधं	संरोध
71	1	विन्येवीवंरत्	विन्यवारयत्
79	1	अबुद्धा ननु तिष्ठन्त	अबुध्याननुष्ठिन्त

Sloka	Vers	Au lieu de :	lisez :
88	1	कुशेशयाव्यस्त	कुशेशयाद्वस्त
94	2	सुकृतोदारे	सुकृतोदारो
95	2	वरान्धरां	वसुन्धरां
108	2	यश:श्रद्धया	यश:सुधया
110	2	हेमाण्डस्य	हेमाङ्गस्य
116	1	स तत्रोज्झूटितस्तेन म्लेच्छाच्छादितमण्डल:	ते यत्रोज्झटितास्तेन म्लेच्छाच्छादितमण्डला:
Id.	2	स्थानमुज्झूट	स्थानमुज्झट
127	2	पर्य्याप्तम	पर्याप्तिमं
139	2	नेष्यन्ति	नेच्छन्ति
148	2	त्वमं	समं
160	1	तप्रोऽविभूतयश्चिन्त्या	तपोविभूतयोऽचिन्त्या
164	2	सरिदाहृतिं	सरिदाकृतिं
170	2	शुष्कलैत्र	शुष्कत्तेत्रं
172	1	पुरनिर्वृते	परिनिर्वृते
Id.	2	सद्ह लोकधातौ	शवलोकधातौ
173	2	षडर्व्हनंसश्रयी	षडर्द्वनसंश्रयी
175	1	स्वनांमाङ्क	स्वनामाङ्क
Id.	id.	शशाङ्काङ्कशेखरं	शशाङ्कार्द्धशेखरं
Id.	id.	विरचय्य	विरचर्य
Id.	2	पराध्यविभवं	परार्द्धविभवं
176	2	स्वञ्चे	चन्द्र

Sloka	Vers	Au lieu de :	lisez :
184	1	यत्नविप्लव:	यज्ञविप्लव:
186	2	ह्रिसदोषाश्च	ह्रिमदोषांश्च
189	1	देवेऽस्मिन्	देशेऽस्मिन्
196	2	साध्वंमन्यो	सांद्रामन्यो
229	2	वदन्	वहन्
230	1	विवक्तॄणां	विवेक्तॄणां
236	1	ह्नात्वेतस्मिन्	ह्रात्येतस्मिन्
246	2	पराध्य	परार्द्ध्य
258	2	सज्ञानि	सज्ञामि
263	1	मधुकैटभयोर्म्मेरु:	मधुकैटभयोर्मेद:
265	1	सयोजनाधिके	सा योजनाधिके
278	1	पित्रं	पित्र्यं
282	2	तामयोजयद्भूतो	तामयोजयद्द्रुतो
301	1	तीव्रशक्तिमपाहरत्	तीव्रशक्तिरपाहरत्
302	2	गन्धेभो	गन्धेभो
Id.	*id.*	व्यधारयत्	व्यदारयत्
311	1	भाद्रा	भार्य
320	1	खुरखड्गासिधेन्वादि	खुरखड्गासिधन्वादि
324	2	यत्ना:	यत्न:
331	1	संस्कारामुत्तता	संस्कारादुत्त्रासं
Id.	*id.*	जनै:	जन:
332	1	सजनाह्लादको	स जना:ह्लादको

Sloka	Vers	Au lieu de :	lisez :
334	1	स वंकेशं	स वकेशे
337	2	म्यमन्व्यत	न्यमन्व्यत
339	2	दृषत्यद्यापि	दृषद्यद्यापि
343	2	आमं	ग्रामं
345	1	खागिकाह्लादिं ग्रामे	खागिकाह्लादि ग्राम
351	1	कृद्ढे	कृद्धे
362	1	दीर्घनर्म्मशाश्वत्कथा	दीर्घनर्मश्वासत् तथा
365	1	उपेचितास्यं	उपेक्षितस्य
374	1	आजानेयरज्ञोऽङ्गराग	आजानेयरज्ञो ऽङ्कराज
377	2	लेखैरत्युत्सङ्गं	लेखैरभ्युत्सङ्गं
379	1	युगबल	युगतलं
Id.	*id.*	विलोलं	विलोमं
380	1	आशोकुकान्त्यां	आशोकशान्त्या

LIVRE II.

13	1	नानार्णव	नानावर्ण
27	1	शोभिन	शोभिना
34	2	वारिताः	वाहिताः
62	1	मुदारमयोग्यता	सुधारसयोग्यतां
68	1	ऽपिहितुं	ऽपोहितुं
74	2	सरस्वरीं	सरस्वती

Sloka	Vers	Au lieu de :	lisez :
91	1	वेष्टिताङ्घ्रिः	वेष्टिताङ्घ्रिं
Id.	2	स्वकं कालं	स कंकालं
104	2	दर्शयन्	ददर्श
107	1	संयोगं	संभोगं
109	2	योगेभ्यस्तत्र	योगिन्यस्तत्र
133	1	प्रमोदात्	प्रसादात्
134	3	स	स्व
140	2	प्राज्यः	प्राज्ञः
142	1	काश्मीरो ग्रीष्मस्त्रिदिव	काश्मीरोऽग्रीष्मत्रिदिव
143	1	फुल्लाब्जावण्डरुद्धाशाः	फुल्लाब्जषण्डरुद्धाशाः
147	1	समव्यसनिनसं	शमव्यसनिनस्
155	2	वंश्ययोग्यवान्	वंश्ययोग्यया
160	2	वैराज्यं	वैरस्यं
164	2	कच्चित्	कश्चित्
172	2	रेणुः	वेणुः

LIVRE III.

5	2	मार्मर्य्यादा	मानमर्यादा
6	2	प्रापितां	प्रापिता
9	1	वल्लभास्यागृतप्रभा	वल्लभास्यामृतप्रभा
10	2	लोस्तोन्या	लोस्तान्या

Sloka	Vers	Au lieu de :	lisez :
12	2	पशुस्त्रियं:	पशुश्रिय:
16	1	वह्निर्विह्वरं	वह्निर्विह्वरन्
28	1	अभूत	अभूद
31	1	वेलावनोपान्ता	वेलावनोपान्ते
32	1	र्भणितस्य	र्भणित:स
Id.	2	स त्राता	स तत्र
39	2	बाध्यो	बध्यो
40	1	सुविग्रहं	स्वविग्रहं
49	1	चेत् घणा	चेद्घृणा
53	1	त्वां	त्वं
59	1	क्लान्त	क्रान्त
65	1	पुण्यपुण्यतां	पुण्यपुण्यता
79	2	समंण्डलं	स्वमण्डलं
86	2	भूमे:	भूमे
95	2	नंनुरुन्धन्ति	नानुरुन्धन्ति
100	2	त्रिगर्तोर्व्वीं	त्रिगर्तोर्वीं
110	2	तेजस्विमैत्रीं	तेजस्विमैत्री
131	2	परभागोपरम्भाय	परभागोपलम्भाय
133	2	वैदग्ध्यं	वैदग्ध्य
135	1	सावद्य:	सद्विद्य
137	1	शान्तमुचित	स्वान्तमुचित
138	2	हिमविक्राय:	हिमविक्रिय:

Sloka	Vers	Au lieu de :	lisez :
140	1	नर्म्मोक्ता	नर्मोक्तया
144	2	श्लेषभयं	क्लेशभयं
145	1	नचास्मद्	न चास्माद्
156	2	नास्मत्	नास्मात्
157	1	स्थैर्य्य	स्थैर्ये
Id.	2	सोत्साह्	नोत्साह्
158	2	सत्यानां	सभ्यानां
165	1	दध्यां	दध्यौ
166	2	तावदानृण्यमाप्नुयात्	तावदानृण्यमाप्नुयां
172	1	भूरिभाकार	भूरिभाकार
Id.	2	प्रकल्पिता	प्रकम्पिता
175	2	तदपृष्टो	तं दृष्टो
181	2	र्व्वरी	शर्वरी
186	2	प्रतिमाति	प्रतिभाति
192	1	तृपते:	नृपते:
195	1	प्रव्यायिता	प्राव्यापिता
Id.	*id.*	निवारकाणि	निवारकानि
200	1	प्रविकिरेल्लं:	प्रविकिरल्ल
Id.	*id.*	समीरैर्ध्वि:	समीरैरब्धि:
205	1	पाथोधैरांत्तान	पाथोधैरात्तान
209	1	मूर्द्धत्ताद	मुर्द्धताद
240	2	सम्भारो	संभारो

Sloka	Vers	Au lieu de :	lisez :
243	1	परिनिर्लुठन्	परिनिर्लुठत्
Id.	2	स्वास्रव	स्वास्रोत
245	2	'स्वसमानस्तं'	स्वसमानस्त्वं
246	2	विलब्धन्तदिदम्	विलब्धं तदिदं
248	1	कश्चित्	कश्चित्
254	2	लिखित्वा	लिखित्वा
267	2	यद्ग्रामान् मम्भःश्वशुर	यद्ग्रामानम्भःस्वसुर
268	1	क्ष्मां	क्ष्मां
272	1	साधकम्	साधकः
275	1	भावे	भावं
278	1	क्ष्माभृद्	क्ष्माभृद्
286	2	रोषणे	रोषेण
288	2	स्पर्द्धाम्विधूयोन्नतां	स्पर्द्धां विधायोन्नता
313	1	प्रदिपादिताम्	प्रतिपादितां
337 (1)	2	तालार्द्ध्वचरणोचितं	तालावचरणोचितं
349	2	क्षुरिकावाल	क्षुरिकावार
351	1	यन्त्रेणाधिष्ठितञ्च	यन्त्रेणाधिष्ठिते च
353	1	जानतो	जानता
359	2	सोमयो	स मयः
364	2	ग्रीष्मोऽग्रे	ग्रीष्मोष्णे

(1) Le nombre 310 du sloka, page 33 de l'édition de Calcutta, devrait être 315, et l'erreur va jusqu'à la fin du livre. Nous avons gardé les nombres tels qu'ils sont.

Sloka	Vers	Au lieu de	lisez :
364	2	क्रतुतो	क्रतुतो
365	2	क्रतुं	क्रेतुं
374	1	स्नापयता	स्नापयतां
396	1	अबन्ध्यदर्शनाद्विन्ध्ये	अवन्ध्यदर्शनां विन्ध्ये
400	1	मृल्लेपाप्रेडिताङ्गकः	मृल्लेपापीडिताङ्गकः
406	1	प्रह्वताः	प्रह्वतां
417	2	तपस्यान्तामिवा	तपस्वन्ताविव
443	2	अश्वखण्डैः	अश्मखण्डैः
445	2	स्वमर्चोदेवमादत्तं	समर्चौ देवमादितं
450	2	शनैर्द्व्योः	शनैर्द्वौ
458	2	कान्तिः	कान्तिं
468	2	वसन्तं	वसन् तुः
469	1	कृत्वष्टिका	कृत्वेष्टिका
484	2	विम्बौ	विम्बा
492	2	सञ्जाता	संजातो
Id.	*id.*	सा	स
493	1	निश्चिन्वाते	निश्चिन्वते
494	1	दिनपतिर्ह्लास्य	दिनपतिर्ह्लास्यः
495	2	नयाचितम्	नयोचितं
496	2	कौवीर	कौवेर
503	2	सश्मितं	सस्मितं
506	1	तदाश्लेषसह्लाङ्का	तदाश्लेषासह्लाङ्का

Sloka	Vers	Au lieu de :	lisez :
510	1	स्वासैर्	श्वासैर्
521	2	भूमिभूतमनुत्पाद्य	भूमिभूतमनुत्पाठ्य
524	1	त्वङ्ग:स्वांशुकपल्लवे	त्वङ्गस्यांशुकपल्लवे
528	1	वन्ध्यां	वन्ध्यं
Id.	2	मौले:	मौलि:
529	1	शान्तें	शान्ता
530	1	वत्यविघ्न:	विमत्यविघ्न:
Id.	*id.*	पावने	पावनैस्
Id.	2	राजजामातुरुच्चर्व्यधित	राजजामतुरुच्चैर्व्यधित
Résumé du livre.		राजरङ्गिण्यां	राजतरङ्गिण्यां

LIVRE IV.

Sloka	Vers	Au lieu de :	lisez :
1	1	सिद्धी	मिश्री
3	1	पतिर्गोपित	पत्युर्गोपित
5	2	आदीयत्	अदीयत्
6	2	वत्सराणां	स वर्षाणां
Id.	*id.*	क्ष्मावृषास्तम्	क्ष्मावृषोऽस्तम्
9	2	पुण्या नमन	पुण्यानमत
14	2	प्रजानां	प्रजातां
17	1	विलोक्य	व्यलोकि
18	1	विभ्रम:	विभ्रमं

Sloka	Vers	Au lieu de :	lisez :
Id.	2	मङ्गलं तस्यै वरस्य	मङ्गलमिव स्मरस्य
22	2	मज्ञानामपि	अज्ञातामपि
23	2	वावर्त्य	व्यावर्त्य
29	2	शमिना	शमिता
34	2	कीर्णकर्ण	कीर्णाकर्ण
38	1	शापास्त	सापास्त
48	2	अमानु	द्रुमानु
50	1	फलीभूद्विविघ्नधीः	फलेऽभूद्विविज्ञधीः
Id.	2	समाचरत्	समाचरन्
60	2	कोऽधुना	कोऽध्वना
70	1	सौम्य	सौध
73	1	माञ्चेद्देव न	सा चेद्देवेन
Id.	2	तदुचित	तदुचितं
80	2	गम्मीर	गम्भीर
81	1	सर्व्वाधिकरणास्थैर्य्या	सर्वाधिकरणास्थैर्या
87	1	निरुत्सेकः	ऽनहंकारः
90	2	धार्य्यन्ते	बाध्यन्ते
93	1	पितृदोषी	पितृद्वेषी
96	1	ततस्तं	ततस्तां
97	1	प्रसङ्गो निश्चित	प्रसङ्गोऽनिश्चित
98	2	न शस्यते	नशनसमे
108	2	दृष्ट	दृष्टं

Sloka	Vers	Au lieu de :	lisez :
111	1	द्रष्टु	स्रष्टु
114	1	पापगुणोन्नतं	पापा गुणोन्नतं
120	1	भ्रातृद्रोहास्र	भ्रातृद्रोहास्त्र
128	1	पटवासमधर्म्मभिः	पटवाससधर्मभिः
Id.	2	द्विजेन्द्रस्य	द्विपेन्द्रस्य
134	2	पुंमांश्चक्रे	पुंसां चक्रे
138	1	ऽनयत्	ऽभवत्
149	1	लक्ष्मीपर्य्यङ्क	लक्ष्मीपर्यङ्क
158	1	क्षिप्रा	क्षिप्र
167	2	ह्याननां	ह्याननान्
171	1	सस्पर्शे	संस्पर्शी
174	2	कवाटिनां	कराटिनां
185	1	पर्णोत्सम्पूर्णम	पर्णोत्सम्पर्णाम
200	1	हस्ताद्रोपयित्वा	हस्तान् रोपयित्वा
235	1	वचोलङ्घ्यं	वचोऽलंघ्यं
236	1	चेतसिभूपाल	चेतस् भूपाल
254	1	सामान्येनैव	सामान्येष्वेव
255	2	स्यन्दैः	स्यन्दः
260	2	स्वगतो	सुगतो
262	2	सकाशाय	सकशाय
269	2	वर्त्तमानो	वर्द्धमानो
274	1	पीठोत्कीर्णौ निवेदितौ	पीठोत्कीर्णौनिर्वेटितौ

Sloka	Vers	Au lieu de :	lisez :
279	2	सचिवमाव्यतं	सचिवमात्मानं
282	2	कदाचिद्वमवदद्विजेन	कदाचिद्वमवदद्विजने
285	1	जयोह्नितं	जयोन्मितं
Id.	2	गिरे:	गिरि:
288	2	नेन	तेन
302	2	सरातलात्	रसातलात्
305	1	राज्ञोऽपि	राज्ञा अपि
319	1	श्रुते प्रनष्टे	श्रुतेऽप्रनष्टे
321	2	महात्ममिर्	महात्मभिर्
331	2	कर्म्मातिरत्नै:	कर्मातिरत्नै:
Id.	*Id.*	परमप्रमेय	पुनरप्रमेय
342	2	सुराष्ट्रं	स्वराष्ट्रं
345	1	सुभेद:	स्वभेद:
348	1	भवेयुडामरा:	भवेयुर्डामरा:
349	1	कथाभोज्यम	कुथाभोज्यम
353	1	चेष्टानुसारिणो	चेष्टानुसारेणा
359	2	भूया	भूयो
360	1	तान्	तां
Id.	2	आर्नचु:	आनर्चु:
371	2	हेवाकिनां	हेतुकानां
386	2	विकृतिं	विकृतं
396	2	समभवन्	समभवन्

Sloka	Vers	Au lieu de :	lisez :
397	2	म्लेच्छाचितां	म्लेच्छोचितां
398	1	वकुधां	वसुधां
411	1	सैन्यान्	सैन्यात्
413	2	अभ्यवर्त्तत	अत्यवर्त्तत
425	1	असंपृष्ठे	अंसपृष्ठे
Id.	2	भवेद्धुवं	भवेद्धव
428	1	सिंह:सत्यपि	सिंहोऽसत्यपि
437	1	अचिराज्ज्ञात	अचिराज्ज्ञात
451	1	स्तब्धस्रोत्रो	स्तब्धश्रोत्रो
		कम्प्रकुर्च्च :	कम्प्रकूर्च्च :
Id.	2	तदस्त	उदस्त
469	1	तदर्पित :	तदर्थित :
470	1	संहासनं	सिंहासनं
477	1	यामीत्युक्त्वा हिताशन :	यामीत्युक्त्वार्थिताशन :
478	2	विवेष्टमानं	विचेष्टमानं
484	1	महाप्रतीहार	महीप्रतीहार
487	1	व्याचक्षाण :	व्याचक्षाणान्
497	2	देशे	देशं
499	1	स्वादुविवेकिभि :	स्वादविवेकिभि :
504	2	स्वदेशमनयद्भूतैर्	स्वदेशमनयद्दत्तैर्
506	1	पुरत्रयं	बुद्धत्रयं
510	1	राज्यं	वाद्य

Sloka	Vers	Au lieu de :	lisez :
517	1	सह्स	साह्स
526	2	पिटको	पिडको
530	2	अग्रात्	अगात्
533	1	तता निःशेषिता	ततोऽ निःशेषिता
535	2	तस्थावरपुडि:	तस्थावरमुडि:
540	1	वीचिसंमर्म्म	वीचिसंमर्द
546	1	तेजस्विप्रवर्य्यमायितं	तेजस्विप्रवर्यमापि तं
547	1	अपश्यन्निर्गतं	अपश्यन् निर्गत:
554	2	सत्कृत्यारमुडे:	सत्कृत्यरमुडि:
558	2	तस्मात्त्वं	तस्मात् तं
559	2	यदि तन्मध्यगा:	यदेतन्मध्यगा:
Id.	*Id.*	वन्धुं	वद्धं
562	2	नृप:	नृपं
563	2	कल्पना	कल्पना:
571	1	श्रुत्वेति	श्रुतेति
573	2	आभेद्यो	अभेद्यो
579 (1)	2	तां	त्वां
584	1	नत्यत्वाबन्ध:	नृत्यत्वाबन्ध:
586	1	क्षणं	क्षणे
587	1	नाभूद्विसदृश:	नाभूद्विसदृश:

(1) Dans l'édition de Calcutta se trouve ici, et ailleurs, une erreur dans les numéros des slokas: 580 devrait être 575. On a laissé ces nombres tels qu'ils sont.

Sloka	Vers	Au lieu de :	lisez :
589	1	सा नम्लानिर्................	मानम्लानिर्
591	1	श्रीराज्यान्................	स्त्रीराज्यान्
607	2	स्वर्गाकरं................	स्वर्णाकरं
608	2	स्वर्णसूर्दृश्यते............	स्वर्णसूर्दृश्यते
615	1	विमानिनां..............	विमाननां
Id.	2	त्वां....................	तां
626	2	कायस्थवक्तृप्रेक्षित्वं......	कायस्थवक्त्रप्रेक्षित्वं
629	1	इवानीकं................	इवानेक
630	2	नान्त्यात्................	नान्त्यान्
633	2	लेशात्................	लेशान्
647	2	प्रभावव्यापकं..........	प्रभावव्यापकं
649	1	भावभाव................	भावाभाव
657	1	विसर्पि................	विसर्प
661	1	मत्स्यद्रविणकणुष........	मत्स्या द्रविणकलुष
Id.	*Id.*	क्षिति................	स्थितिं
Id.	2	कान्तन्त................	कान्तत्व
666	2	यच्चारुणा................	यश्चारुण
672	1	वारयत्................	वारयन्
674	1	मुद्राङ्क................	मुद्राङ्कं
Id.	1	दुराचारैः	दुराचारः
675	1	तत्................	तं
676	1	यागवार्द्धित्वं....	योगवार्द्धित्वं

Sloka	Vers	Au lieu de :	lisez :
681	2	कल्पपाल्यायां..	...कल्पपाल्यां यो
683	1	मम्मधर्म्मै:	मम्मधर्मै:
686	1	प्रविष्टो दृष्यते	प्रविष्टः पुष्यते
686	2	कश्चिद्देव	कैश्चिद्देव
691	1	तया	तथा
692	2	विरोधी	विरोधो
696	2	मुखान्	सुखान्
699 (1)	2	पञ्चस्वाम्यन्ते	पञ्चस्वाम्यास्ते
701 (Éd. Calc. 696.)	1	धर्म्मोद्यमे	धर्मोद्यमो
Id.	*Id.*	विनिर्म्मिते	विनिर्मितेः
722 (727)	1	नित्यञ्च दृन्ति	नित्यं वदन्ति

LIVRE V.

7	2	सन्ताप्यतेन च रसं	सन्ताप्येत् न चरमं
8	1	स्ववेश्याभिः	स्वर्वेश्याभिः
12	1	स्थलेषु	स्थूलेषु
15	2	रोरशिखि	रोह्लशिखि
16	1	स्वर्गादितूर्णतां	स्वर्णादिचूर्णतां
31 (2) (Éd. Calc. 36.)	1	दत्वा	दत्ता

(1) Le sloka 690 de l'édition de Calcutta devrait être 695.

(2) Le sloka 30 est marqué 35, et l'erreur va jusqu'à la fin du livre.

Sloka	Vers	Au lieu de :	lisez :
36 (Éd. Calc. 41.)	2	समा	सठा
42 (47)	1	ढश	च स
48 (53)	1	भूतेश्वरो	भूतेश्वरं
48 (53)	2	अनुगुणोष्यस्मिन्	अनुगुणे स्वस्मिन
64 (69)	2	आसीत्कुमरो	आसीठमारो
73 (78)	2	अयोनिजत्व	अयोनिजत्वं
97 (102)	2	यान्त्यो	यान्त्यौ
102 (107)	2	स्वेच्छानुसारण	स्वेच्छानुसारेण
103 (108)	1	वद्धा	वद्ध्वा
109 (114)	2	नाढ्येन	नाठ्येन
126 (131)	2	क्ष्मावृषास्तम्	क्ष्मावृषोऽस्तम्
142 (147)	1	जनोल्वणैः	जवोल्वणैः
151 (156)	2	भृत्यै भूते	भृत्यीभूते
163 (168)	1	पूतभूर्तं यः	पूतमूर्तयः
Id.	2	व्यसनाशक्ति	व्यसनासक्ति
164 (169)	2	अधीयमान	आधीयमान
165 (170)	1	क्षीणकोशाः	क्षीणकोशः
Id.	2	जह्लारायासयुक्तिभिः	जह्लारायामयुक्तिभिः
168 (173)	2	मुमोच्चे	मुमोषे
171 (176)	2	तद्देशार्द्रैः	तद्देशार्व्यैः
177 (182)	2	पापीयस्त्वानि योगिनाम्	पापीयस्त्वानियोगिनाम्
180 (185)	1	तत्प्रात्यवेक्षया	तत्प्रत्यवेक्षया

Sloka	Vers	Au lieu de :	lisez :
185 (Éd. Calc. 190.)	2	ऽप्यनिष्टाढन्यत्र	ऽप्यनिष्टाढन्यन्न
190 (195)	1	दायाढव्यय	दायादव्यय
191 (196)	1	राजा संवाद्	राजसंवाद्
205 (210)	1	कल्यपाल	कल्यपाल
214 (219)	2	पथ	पथं
217 (222)	2	प्रसादाद्	प्रमादाद्
260 (265)	2	ववन्धुस्तान् पलायितान्	ववन्धुस्तां पलायितां
274 (279)	1	आधेय	आढ्य:
275 (280)	1	टृष्टिसम्पाते	वृष्टिसंपाते
281 (286)	3	कांटूतीं	कण्डूतिं
282 (287)	1	दधु:	ददु:
Id.	2	यं	यां
283 (288)	2	ऽत्यर्थ	ऽभ्यर्घ्य
317 (322)	1	राजन्यु	रजन्यु
320 (325)	1	जानन्ति	जानाति
Id.	2	परं	पर:
325 (330)	2	कोशं	कोषं
